# खण्ड - 'घ'

# निबन्ध

**नवीनतम पाठ्यक्रमानुसार इस प्रश्न के अन्तर्गत प्रश्न-पत्र में दिये गये किसी एक विषय पर 15 पंक्तियों में संस्कृत में निबन्ध लिखना होता है, जिसके लिए 10 अंक निर्धारित हैं। (अंक 10)**

## ऐसे लिखें निबन्ध

निबन्ध लिखना भी एक कला है। इसके लिए अनुवादों के नियमों को ध्यान में रखना आवश्यक है। सबसे अच्छा निबन्ध वह समझा जाता है, जो छात्र अपनी योग्यता से सोच-समझकर लिखता है। पुस्तक से रट कर निबन्ध लिखने पर अशुद्धियाँ भी हो जाती हैं और अंक भी कम मिलते हैं। इसलिए निबन्ध लिखने के लिए निम्नलिखित बातों को ध्यान में रखना चाहिए–

1. जिस विषय पर निबन्ध लिखना हो, सबसे पहले उस विषय पर शान्त-चित्त से विचार करना चाहिए कि इस विषय में कौन-कौन-सी बातें रखी जानी हैं।

2. जब यह ध्यान में आ जाय कि इस विषय पर ये-ये बातें लिखनी हैं तब उन सब बातों को हिन्दी में लिख लेना चाहिए। लिखते समय वाक्य बहुत छोटे-छोटे और सरल होने चाहिए। निबन्ध लिखते समय कभी भी लम्बे और क्लिष्ट वाक्य मत लिखिए।

3. इसके बाद उन वाक्यों को क्रम से लगा लीजिए अर्थात् एक तरह की बात कहनेवाले वाक्यों को एक साथ रखिए फिर वाक्यों को इस दृष्टि से पढ़िए कि इनका अनुवाद संस्कृत में करना है। यदि किसी वाक्य के अनुवाद करने में कठिनाई हो रही है तो उस वाक्य को पलट कर ऐसा बना लीजिए जिसका शुद्ध अनुवाद आप कर सकें।

4. अपने विद्यालय, गाँव, पिता, अध्यापक आदि का नाम भी आप पलट दीजिए– यदि वह अनुवाद करने में कठिनाई पैदा कर रहा है। जैसे– मेरे विद्यालय का नाम हरचरन शिवचरन लाल शिक्षा मन्दिर इण्टर कालेज, जलेसर है। इस वाक्य को बदल कर इस प्रकार लिख लीजिए– 'मेरे विद्यालय का नाम आदर्श शिक्षा मन्दिर है। यह जलेसर में स्थित है।' आपके विद्यालय में उन्तीस अध्यापक हैं। आप उन्तीस की संस्कृत नहीं जानते हैं, तो अध्यापकों की संख्या घटा-बढ़ा कर ऐसी कर लीजिए, जिसकी संस्कृत आप आसानी से बना सकें। यदि आप संख्याओं की संस्कृत जानते ही नहीं, तो अंकों में भी लिख सकते हैं (जैसे– विंशतिः अध्यापकाः के स्थान पर 20 अध्यापकाः) फिर दूसरे वाक्य लिखिए। हमारा विद्यालय विशाल है। इसमें छात्र पढ़ते हैं। एक प्रधानाचार्य हैं। प्रधानाचार्य सज्जन हैं। कृष्णदत्त हमारे कक्षाध्यापक हैं। विद्यालय में एक उद्यान है। उसमें फूलों के पेड़ हैं। इसमें हम खेलते हैं इत्यादि। सीधे-सादे वाक्य लिखकर उनका संस्कृत में अनुवाद कर दीजिए। यह मत सोचिए कि हमारे विद्यालय में तो उद्यान नहीं है, हम कैसे लिखें? निबन्ध लिखते समय जो आपके यहाँ हैं, उससे कोई विशेष तात्पर्य नहीं है। देखना तो यह है कि आप संस्कृत में अपने विचार प्रकट कर सकते हैं अथवा नहीं।

5. प्रारम्भ में ऐसे सरल वाक्य बनाने में परेशानी होती है और वाक्य नहीं बन पाते; किन्तु कुछ दिन अभ्यास करने के उपरान्त वाक्य बनाना आ जाता है और उनका संस्कृत में अनुवाद करके बड़ी आसानी से चाहे जिस विषय पर आप निबन्ध लिख सकते हैं।

## ➡ (1) रक्षाबन्धन

[2014 CT]

भारतदेशे उत्सवानाम् प्राचुर्यं वर्तते। अत्र अनेके उत्सवाः प्रचलन्ति। यथा धार्मिकोत्सवाः, सामाजिकोत्सवाः, महापुरुषजन्मोत्सवाः, राष्ट्रियोत्सवाः च। एषु उत्सवेषु धार्मिकोत्सवाः महत्त्वपूर्णाः यतः भारतीयाः धर्मप्राणाः सन्ति। तेष्वपि रक्षाबन्धनोत्सवः विशेषेण महत्त्वपूर्णः अस्ति। अस्योत्सवस्य महत्त्वं सर्वं एव स्वीकुर्वन्ति।

अयं महोत्सवः श्रावणमासस्य पूर्णिमायां भवति। अयं समयः अति मनोरमम् भवति। भूमौ सर्वत्र हरीतिमा दृश्यते। वृक्षेषु कूजन्तः पक्षिणः श्रवणयोः मधु इव क्षरन्ति एवंविधे समये अयम् उत्सवः सर्वान् मोदयति। पुराणानुसारं सर्वप्रथमम् इन्द्रपत्न्या स्वपतेः इन्द्रस्य दानवेभ्यः रक्षणार्थम् तस्य हस्ते रक्षासूत्रं बद्धम्। ततः एवं अयमुत्सवः प्रवर्तितः। ततः अनेनैव रक्षासूत्रेणैव इन्द्रेण दानवेन्द्रो बलिः बद्धः।

भारतीयेतिहासे राजपुत्राणां समये राज्ञः स्वरक्षार्थम् एकं बलवतं राजानं निजभ्रातरं मत्वा तस्य हस्ते रक्षाबन्धनम् अकुर्वन्। पुरा अस्मिन्नेव दिने ऋषयः ब्राह्मणाश्च यजमानानां हस्तेषु रक्षासूत्रम् अबध्नन्। ते राजानः यजमानाश्च तेभ्यः प्रचुरं द्रव्यं यच्छन्ति स्म। अधुना तु ब्राह्मणाः सर्व एव न, अपितु केचिदेव, भिक्षुकाः भूत्वा अति स्वल्पधनार्थम् प्रतिगृहं गच्छन्ति–अयं महान् खेदजनकः विषयः।

अयमुत्सवः प्राधान्येन ब्राह्मणानाम् अस्ति किन्तु अधुना सर्ववर्णमानवाः इमम् उत्सवम् अभिनन्दन्ति। अस्मिन् दिने भगिन्यः अतीव प्रसन्ना दृश्यन्ते। प्रायेण अस्मिन् दिने भगिन्यः स्वपतिगृहात् भ्रातृगृहम् समागत्य भ्रातृणां हस्तेषु रक्षासूत्रं बध्नन्ति। भ्रातृभ्यश्च धनं वस्त्रादिकं लभन्ते। ब्राह्मणाश्च यजमानहस्तेषु रक्षाबन्धनम् विधाय दक्षिणा-द्रव्यम् आप्नुवन्ति।

अस्मिन् उत्सवे प्रतिगृहं घृतखण्डदुग्ध्युक्ताः सूत्रिकाः (सेवई) पच्यन्ते। धर्मप्राणाः जनाः तीर्थस्थानानि गत्वा दानं पुण्यञ्च कुर्वन्ति। नदीषु, सरोवरेषु च स्नानं कुर्वन्ति।

अयम् उत्सवः भारतीय संस्कृतेः उज्ज्वलतायाः एवं महत्तायाः सूचकोऽसि।

## ➡ (2) विजयादशमी (दशहरा)

[2017 NN]

भारतवर्षे अनेके विविधाश्च उत्सवाः प्रचलन्ति। यथा धार्मिकोत्सवाः, सामाजिकोत्सवाः, महापुरुषजन्मोत्सवाः राष्ट्रियोत्सवाश्च। एषूत्सवेषु धार्मिकोत्सवाः महत्त्वपूर्णाः। यतः भारतीयाःधर्मप्राणाः सन्ति। तेष्वपि विजयादशमी महोत्सवः विशेषेण महत्त्वपूर्णः अस्ति।

अयमुत्सवः आश्विनमासस्य शुक्लपक्षे दशम्यां तिथौ भवति। अस्मिन् समये वर्षर्तुः समाप्तिमुपयाति शरच्चागच्छति। मार्गाः अपङ्काः, सुखदं वातावरणम्, निर्मलम् आकाशं च सर्वमेव रुचिरं प्रतीयते। एवमनुश्रूयते यत् दशरथपुत्रेण श्रीरामचन्द्रेण अस्मिन्नेव दिने राक्षसराजरावणस्य विनाशाय लङ्कायाम् आक्रमणम् कृतम्। पुरा क्षत्रिया अस्मिन्नेव दिने शस्त्राणां पूजां विधाय युद्धार्थं प्रस्थानम् अकुर्वन्। इदमपि कथ्यते यत् महादेव्या भगवत्या काल्या अस्मिन्नेव दिने असुराणां विनाशः कृतः।

इममुत्सवम् प्राधान्येन क्षत्रियाः अभिनन्दन्ति। पुरा अस्मिन्नेव दिने राजगृहेषु महान् उत्सवः अभवत्। यद्यपि सम्प्रति राज्ञां नामशेषमेव जातं तत्र उत्सवः सम्पद्यते। क्षत्रियवर्णम् अन्तरेण अन्ये वर्णा अपि इममुत्सवं सोल्लासम् अभिनन्दन्ति। क्षत्रियाः ब्राह्मणाः वैश्याः शूद्राश्च सर्व एव अस्मिन् उत्सवे उल्लसन्ति।

अस्मिन् अवसरे समस्ते भारते ग्रामे-ग्रामे, नगरे-नगरे च रामलीलायाः प्रदर्शनं भवति। असंख्याः जनाः आबालवृद्धाः रामलीलोत्सवं द्रष्टुम् गच्छन्ति तत्र रावणवधं, तद्दहनं च दृष्ट्वा आमोदन्ते। अस्योत्सवस्य प्रधानः सन्देशः अस्ति यत् दशसु इन्द्रियेषु विजयः प्राप्तव्यः। यदि वयं स्वेन्द्रियाणि संयम्य रावणरूपम् अहंकारम् नक्ष्यामस्तु तदा वयं नूनं संसारे विजयं प्राप्स्यामः।

## ➡ (3) मित्रम् (सन्मित्रम्)

[2020 ZR]

मनुष्यः सामाजिकः प्राणी। समाजे एव तस्य सत्ता। न हि समाजं बिना स जीवितुं शक्नोति। सामाजिकजीवने मित्राणाम् आवश्यकता भवति। एकाकिनः कस्यापि कार्याणि न हि सिद्ध्यन्ति।

परं मित्रं कीदृशं भवेदिति विचारणीयम्। मित्रस्य निर्वाचने सावधानतायाः आवश्यकता भवति। संसारे अनेकानि मित्राणि मिलन्ति। स्वार्थं साधयितुम् एव तेषां मित्रता भवति। यावत्ते खादितुं स्वादु भोजनं पातुं, मधुरं पेयं च लभन्ते, तावत्तेषां मित्रता। आवश्यकतासमये ते दूरीतिष्ठन्ति। आपत्ति समये ते नालपन्ति। एतादृशैः मित्रैः न कोऽपि लाभः अपितु हानिर्भवति। सत्यमुक्तं केनापि कविना–

**"परोक्षे कार्यहन्तारं प्रत्यक्षे प्रियवादिनम्।**
**वर्जयेत् तादृशं मित्रं, विषकुम्भं पयोमुखम्॥"**

सन्मित्रम् तु वस्तुतः ईश्वरीयं वरदानम्। येन सन्मित्रं प्राप्तं तस्य जीवनं सफलं जातम्। सन्मित्रं पापान्निवारयति। हिताय योजयते, मित्रस्य गोप्यं रहस्यं निगूहति, गुणान् प्रकटी करोति। आपत्तिकाले मित्रस्य साहाय्यं करोति। आवश्यकतासमये धनमपि ददाति। स स्वयं कष्टानि अनुभूयापि मित्रस्य रक्षां करोति। एतादृशं यस्य मित्रं, स तु भाग्यशाली भवति। एतदेव च सद्भिः सन्मित्रलक्षणम् उच्यते।

सन्मित्रं कार्यसिद्धेः द्वारं भवति। मित्रसाहाय्येनैव महान्ति कार्याणि सिध्यन्ति। विभीषण-सुग्रीवादि मित्र साहाय्येन रामः बलवतः राक्षसान् व्यनाशयत्। कृष्णस्य साहाय्येनैव चार्जुनः महाभारतं नाम युद्धं जिगाय, अतः मित्रं संसारस्य अमूल्यं रत्नं कथ्यते।

## ➡ (4) सत्संगतिः *अथवा* सत्संगतिः कथय किं न करोति पुंसाम्

[2010 CJ, 11 ID, HX, 13 BJ, BN, 14 CS, CW, 15 DT, 17 NO, 19 DB, DD, DF]

**सतां सद्भिःसंगः कथमपि हि पुण्येन भवति।** [2016 TP]

सतां जनानां सङ्गतिः 'सत्सङ्गतिः' कथ्यते। सत्सङ्गतिः जनानां सर्वकार्य-साधिका इति सुनिश्चितम्। मानवः सामाजिकप्राणी विशेषः अतः समाजं बिना तस्य किमपि महत्त्वं न विद्यते। सत्संगत्या जनः समाजे समुन्नतं पदं प्राप्नोति। सुदामा श्रीकृष्णस्य सखा आसीत्। सुग्रीव–विभीषणादयो रामसङ्गात् श्रेयः प्राप्तुवन्। श्रीकृष्णस्य संगतिकारणेन एव सुदामा दारिद्र्यं परित्यज्य परमैश्वर्यशाली अभवत्।अजामिलोऽपि सतां सङ्गात् नारायणलोके जगाम। ऋषीणां संगत्या व्याधोऽपि ऋषिवाल्मीकिः अभवत्।

मानवः सज्जनैः सह सज्जनतां दुर्जनैः सह दुर्जनत्वम् च उपति। संगत्या विद्या वृद्धिर्भवति कीर्तिश्च वर्धते। दुर्जनानां संसर्गेण बुद्धिर्दूषिता भवति कीर्तिः नश्यति च। बालकः दुर्जनैः सह सङ्गतिः कदापि न कार्या। सज्जनानां मार्गमनुसरन् को नु समुन्नति शिखरं न परिचुम्बति। सत्संगत्या मूर्खोऽपि विद्यावैभवेन विभाति, दुर्जनोऽपि सज्जनतां सम्प्राप्नोति, कुमार्गाद् सद्मार्गे समायाति।

यदि जनः श्रेष्ठं भवितुमिच्छति, तदा सदा स सत्संगतिः कुर्यात्। दुष्टानां संगतिः सदा अनर्थकारिणी भवति। सत्संगतिः बुद्धेः मूर्खताम् हरति। सत्संगतिः वाचि सत्यम् सिञ्चति। सत्संगतिः मानोन्नतिं दिशति। सत्संगतिः पापम् अपाकरोति। सत्संगतिः चेतः प्रसादयति। सत्संगतिः दिक्षु कीर्तिं तनोति। केनापि कविनां सत्यमुक्तम्–

**'जाड्यं धियो हरति सिञ्चति वाचि सत्यं।**
**मानोन्नतिं दिशति पापमपाकरोति॥**
**चेतः प्रसादयति दिक्षु तनोति कीर्तिं**
**सत्संगतिः कथय किं न करोति पुंसाम्॥'**

अतः सत्संगतिः मानवस्य मनोवृत्तिं परिवर्तयति। अनया पापोऽपि धर्मनिष्ठाः भवति। नलिनीपत्रस्थिताः जलकणाः मौक्तिकीं द्युतिम् आवहन्ति।

## ➡ (5) विद्याधनं सर्वधनंप्रधानम् अन्य शीर्षक

[2011 IA, HX, 13 BJ, BM, 14 CX, CY, 17 NP, 19 CZ, DC, 20 ZQ, ZS]

**किं किं न साधयति कल्पलतेव विद्या** [2017 NL]

**विद्याविहीनः पशुः** [2013 BP, BL, TJ, 16 TJ]

**विद्या ददाति विनयम्** [2011 HZ]
**विद्या महत्त्वम्** [2010 CG, 13 BK]
**विद्या अमृतमश्नुते** [2017 NN]
**विद्या धर्मेण शोभते** [2010 CK]
**विद्यायाः उपयोगिता**
**विद्या महिमा** [2013 BO]
**विद्या प्रभावः** [2016 TP]

विद्यते सद् असद् ज्ञानं अनया सा विद्या कथ्यते। विद्या विनयं ददाति। विनयात् पात्रतां प्राप्यते पात्रत्वात् धनं प्राप्यते धनाद् धर्मं प्राप्यते तत्पश्चात् सुखं लभते। यदुक्तम् –

**विद्या ददाति विनयं विनयाद् याति पात्रताम्।**
**पात्रत्वात् धनमाप्नोति धनाद् धर्मस्ततः सुखम्॥**

अन्यं धनं व्यये कृते नश्यति किन्तु विद्याधनं व्यये कृते वर्धते। विद्याधनं चौरोऽपि चोरयितुं न शक्नोति, नृपः अपहर्तुं न शक्नोति। अन्य सुवर्णादिकं धनं भ्रातृषु विभज्यते किन्तु विद्याधनं भ्रातृषु न विभज्यते। केन कविना सत्यमेव उक्तम् –

**न चौरहार्यं न च राजहार्यं,**
**न भ्रातृभाज्यं न च भारकारि।**
**व्यये कृते वर्धति एव नित्यम्,**
**विद्या धनं सर्वधनंप्रधानम्॥**

विद्यया शोभा भवति। विद्ययैव मनुष्यः ज्ञानार्जनम् करोति। विद्या बुद्धेः मूर्खतां हरति। विद्या दिशासु कीर्तिम् प्रसारयति। विद्या विदेशगमने स्वबन्धुजनः भवति। अतएव विद्याविहीनः जनः पशुः भवति। विद्यासर्वस्य भूषणम् अस्ति। विद्या गुरूणां गुरुः। विद्या नराय धनं ददाति, यशः ददाति, सुखं ददाति, सम्मानं च ददाति। अन्यानि धनानि सञ्चयात् पुष्टतां वृद्धिं च यान्ति परञ्च विद्याधनं सञ्चयात् अदानात् वा नित्यं क्षयं याति। विद्यायाः कोशः अपूर्वः अद्भुतः च। विद्यया एव विदुषः नरस्य सर्वत्र सम्मानः भवति। विद्याप्रभावेण एव ऋषयः मुनयः विद्वान्सः कवयश्च अमराः जाताः।

विद्या कल्पलता इव सर्वकार्यसाधिका अस्ति। विद्या माता इव रक्षति, पिता इव हिते नियुङ्क्ते, कान्ता इव खेदम् अपनयति। विद्या सर्वसुखानां कारणम् अस्ति। विद्या लक्ष्मीं तनोति। विद्यया एव यशः वर्धते। राजा तु स्वदेशे पूज्यते, परन्तु विद्वान् सर्वत्र पूज्यते। विद्यायां देशस्यापि प्रतिबन्ध नास्ति। राजानोऽपि तस्याः पुरस्तात् नतमस्तकाः भवन्ति–

**'स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते।'**

विद्या मानवाय यशः प्रददाति, सुखं सम्मानं च यच्छति। विद्यया शोभा भवति, विद्यया एव मानवः ज्ञानार्जनं करोति। मानवजीवने विद्या तु एका कल्पलता वर्तते। रूपयौवनसम्पन्नोऽपि विद्याविहीनः जनः न शोभते। राजसु विद्या एव पूज्यते धनं न पूज्यते।

विद्याविहीनः मानवः पशुतुल्यः भवति। मानवजीवने विद्याधनं श्रेष्ठं धनम् अस्ति। अतः सर्वे जनाः स्वपुत्र-पौत्रान् पुत्रीश्च सम्यग् रूपेण पाठयेयुः। वर्तमानसमये तु विद्यायाः अतीव आवश्यकता वर्तते। सत्यमेव उक्तम्—

**'विद्याधनं सर्वधनं प्रधानम्।'**

## ➡ (6) उद्योगः

[2008 EU, EZ, 19 DB]

### अन्य शीर्षक

- **श्रमेणैव सिध्यन्ति कार्याणि**
- **उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः** [2017 NK, 18 BN]
- **श्रमस्य महत्त्वम्**
- **उद्योगः सर्वसाधनम्**

- **उद्यमः** [2011 ID, 13 BN]
- **उद्योगिनं पुरुषं सिंहम् उपैति लक्ष्मीः** [2011 ID, 14 CY]
- **उद्योग महत्त्वम्**

संसारे सर्व एव मानवाः सुखमयं जीवनम् कामयते। परञ्च इदं केचिदेव जानन्ति इह सुखमयं जीवनं कथं प्राप्यते? जीवनं सुखमयं विधातुं सुखं शान्तिश्च अपेक्षते। जीवनं पुरुषार्थेनैव चलति। अतः मानवः पुरुषार्थी, उद्यमी भवेत्। अकर्मणि कदापि प्रवृत्तिर्न विधेया।

मनुष्यस्य यदि कश्चिच्छत्रुरस्ति तत् तु आलस्यमेव वर्तते। उक्तञ्चापि—

**"आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।"**

आलस्यं नाम अनुद्योगः। उद्योगशीला एव जनाः सर्वदुखानि विहाय सुखानि समृद्धिं च अनुभवन्ति। उद्योगेन भाग्यमपि परिवर्तयितुं शक्यते। अनुद्योगेन वयं जगति कर्मं कर्तुमसमर्थाः। अनुद्योगः नरस्य शत्रुवर्तते।

उद्यमेनैव नरेण अनेकानि शान्तिकार्याणि कृतानि। उद्यमम् आश्रित्य एवं मनुष्येण रेलवायुयान विद्युत् परमाणुः इत्यादि विविध प्रकाराः आविष्काराः कृताः। अधुना मानवः उद्यमेनैव चन्द्रादि उपग्रहेषु गमनस्य प्रभृतिभिः असम्भवानि दुष्कराणि च कार्याणि सम्पादयति। कथितं च–

उद्योगशीला एव जनाः सर्वदुःखानि विहाय सुखानि समृद्धि च अनुभवन्ति। संसारे उद्योगस्य महन्महत्त्वं सर्वैः स्वीकृतमस्ति। उद्यमी मानवः एव आत्मपौरुषेण स्वाभीष्टसिद्धिम् अनायासेनैव लभते। उद्यमी जनः असम्भवमपि सम्भवं विधातुं शक्नोति। उक्तञ्चापि—

**उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः।**
**न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः॥**

अतः सर्वैरप्युद्योगोऽवश्यमेव कर्तव्यः।

## ➡ (7) भारतीया संस्कृतिः

[2012 HF, 13 BK, 14 CV, 15 DT, 17 NN, 20 ZQ]

संस्करणं, परिष्करणं चेतसः आत्मनोः वा इति संस्कृतिः कथ्यते। संस्कृतिः मानव मनसोऽज्ञानं दूरी करोति। चित्तभयमपहरति, अविवेकान्धकारम् अपनयति, ज्ञानज्योतिप्रकाशयति, शान्तिमादधाति, कल्याणं विस्तारयति, ज्ञानं विकासयति च। किम्बहुना संस्कृति मानवस्य सर्वविधम् अकल्याणं दूरीकृत्य तस्मिन् कल्याणं आदधाति।

सर्वेषां राष्ट्राणां स्वकीया संस्कृतिः भवति। अस्माकं भारतराष्ट्रस्यापि स्वकीया संस्कृतिः अस्ति, या भारतीया संस्कृतिः कथ्यते। इयं संस्कृतिः विश्वस्य प्राचीनतमासु संस्कृतिषु प्रधानतमा अस्ति।

अस्यां संस्कृतौ धार्मिकभावनायाः प्रचुरता अस्ति। जीवनस्य प्रतिक्षेत्रे धर्मस्य विधानम् अस्ति। भोजन व्यापारे राजनीतौ व्यवहारे, पठने, शयने, किम्बहुना सर्वास्वपि जीवनचर्यासु धर्मस्यैव विधानं दृश्यते। अस्यां संस्कृतौ, सर्वत्र आध्यात्मिकत्वं दृश्यते। भौतिक लिप्सां त्यक्त्वा आत्मज्ञानं कृत्वा मोक्ष प्राप्तिः एष भारतीयानां परमं लक्ष्यम्।

भारतीया संस्कृतिः विश्वस्त न केवलं मनुष्येषु अपितु चराचरात्मकेषु प्राणिषु पदार्थेषु च एकस्यैव परमात्मनो विभूतिम् पश्यति। अतएव भारतीयाः ऋषयः कल्याणम् ऐच्छन्—

**"सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।**
**सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुखभाग् भवेत्॥"**

## ➡ (8) संस्कृतभाषायाः महत्त्वम्

[2010 CH, 11 HX, 12 HG, HH, 13 BM, 14 CV, CW, CX, 16 TK, 17 NJ, NP, 19 DC, DD, 20 ZT, ZU]

*अथवा,* **संस्कृत भाषा**

*अथवा,* **संस्कृत शिक्षणस्य उपयोगिता**

*अथवा,* **संस्कृताध्ययनस्य महत्त्वम्** [2017 NK]
*अथवा,* **संस्कृतम् नाम दैवीवाक**
*अथवा,* **देवभाषा-महत्त्वम्** [2010 CG]
*अथवा,* **संस्कृत शिक्षायाः वर्तमान स्वरूपम्** [2012 HE]
*अथवा,* **देवभाषायाः वर्तमानं स्वरूपम्** [2017 NO]

संस्कृतभाषा विश्वस्य सर्वासु भाषासु प्राचीनतमा, सर्वोत्कृष्ट-साहित्य समन्वित च अस्ति। इयमेव सर्वासाम् आर्यभाषाणाम् जननी मता। इयं भाषा वैदिक भाषातोः निःसृताऽस्ति। विद्यमानेषु निखिलेषु अपि साहित्येषु अस्याः भाषायाः साहित्यं सुविपुलं, सर्वश्रेष्ठं सुसम्पन्नञ्चास्ति। तत्र ग्रन्थानां संख्या पञ्चाशत सहस्राद् अपि अधिका वर्तते। वैदिके साहित्ये मन्त्रसंहितात्मक ऋग्वेदयजुर्वेदसामवेदाथर्ववेद-ब्राह्मणआरण्यकउपनिषत्सूत्रग्रन्थाः प्रातिशाख्यअनुक्रमणीग्रन्थाः समायान्ति। लौकिके साहित्ये रामायण-महाभारतपुराणस्मृतिदर्शनकाव्यग्रन्थादयः परिगणिताः भवन्ति। इदं समग्रमेव वाङ्मय अभ्युदय निःश्रेयस् मूलमभिमन्यते। अत्र आधुनिक भौतिक विज्ञानमपि बीजरूपेण विवेचितमस्ति। संसारस्य कस्याऽपि भाषायाः साहित्यं संस्कृतसाहित्यस्य साम्यं नैवाधिगच्छति। अतएव संस्कृतस्य गौरवम्, आचार्यवरोः दण्डी इत्थं सत्यमेव उक्तम्– 'संस्कृतं नाम दैवीवागन्वाख्याता महर्षिभिः'।

संस्कृत साहित्यं नवभिः रसैः विभूषितम्, रीतिगुणालंकारादिभिः समलङ्कृतञ्च अस्ति रसादिध्वनिः अस्यात्मा। वैज्ञानिकञ्च अस्याः व्याकरणं सुनिश्चितं कं सुधियं नो मोहयति। अत्र गद्ये पद्ये च लालित्यं भावबोध सामर्थ्यमद्वितीयमस्ति। चरित्रनिर्माणाय यादृशीं प्रेरणा संस्कृतसाहित्यं प्रददाति, तादृशीं प्रेरणाम् अन्यत्साहित्यं न ददाति।

अस्याः भाषायाः वैशिष्ट्मस्याः व्याकरणापि ज्ञायते। अस्य मूलं यद्यपि ब्राह्मणग्रन्थेषु प्रातिशाख्यग्रन्थेषु च द्रष्टुं शक्यते परन्तु महर्षेः पाणिनेः अष्टाध्यायी, अस्याः महर्षि पतञ्जलिप्रणीतं महाभाष्यं तथा कात्यायनकृताः वार्तिका संस्कृत व्याकरणस्य महनीयं महत्त्वं ख्यापयन्ति। व्याकरणज्ञानमन्तरेण कथमपि संस्कृतस्य स्वर्णिम ज्ञान खनौ प्रवेशः कर्तुं नो शक्यते। संस्कृतस्य नैकाभिः विशेषताभिः सार्द्धं वैशिष्ट्यद्वयं प्रामुख्यं धत्ते।

भारतमातुः स्वातन्त्र्यं गौरवमखण्डत्वञ्च संस्कृतेन एव वेदितुं सुरक्षितुञ्च शक्यन्ते। यत् इयं देववाणी सर्वासु भाषासु प्राचीनतमा श्रेष्ठा च ज्ञानविज्ञानदृष्ट्या सुसमृद्धा अतएव विद्वद्भिः तत्तद्ग्रन्थानामंशैः अस्याः वैज्ञानिकत्वं सेद्धव्यम्, अन्यासां भाषाणां साहित्ये च तस्या एव अनुकरणं प्रदर्शनीयम्। तदैव आधुनिकः शिक्षितः जनः अनुभविष्यति, निश्चेष्यति च।

## ➡ (9) अनुशासन

[2010 CK, 11 IB]

### अन्य शीर्षक

- **अनुशासन समस्या**
- **अनुशासनम् एव शिक्षायाः मुख्य लक्ष्यम्**
- **जीवने अनुशासनस्य महत्त्वम्** [2016TK]

पूर्व निश्चितानां नियमानां ज्येष्ठानाम् आज्ञायाश्च पालनमेव अनुशासनम् कथ्यते। अनु उपसर्ग पूर्वक 'शास्' धातोः 'ल्युट्' प्रत्यय करणेन अनुशासन शब्दः सिद्धयति। संयमः वा आत्मनियन्त्रणाम् एतस्य शाब्दिकः अर्थः। संसारस्य आधारः अनुशासनमेव वर्तते। दार्शनिकाः स्वीकुर्वन्ति यत् सत्वरजस्तमासि मिलित्वा जगत् रचयन्ति। प्रकृतौ सर्वे पदार्थाः अनुशासनबद्धा सन्ति। यथा सूर्यः अनुशासनेन संसारं प्रकाशयति। चन्द्रः नक्षत्राणि अनुशासनं पालयन्ति। अस्याः निखिलायां व्यवस्थायाम् अनुशासनं निहितमास्ते।

अद्य प्रायः विद्यार्थिनः अनुशासनहीनाः सञ्जाताः सन्ति। अयं महद्दुःखस्य विषयः अस्ति यत् भारतस्य प्रशासनेऽपि अनुशासनहीनता व्याप्तास्ति। अनुशासनेन हीनाः चरित्रेण भ्रष्टाः नेतारः भारतीयां राजनीतिम् अधोगतिं प्रति नयन्ति। पतितास्ते राजनीतिं दूषयन्तः भारतीयं जीवनं तिमिरेण आच्छादयन्ति। विधाता एवं सर्वथा रक्षिष्यति भारतम्। गुरुकुलेषु, विद्यालयेषु पाठशालासु चाव्यवस्थायां मूलकारणमनुशासनहीनतैव। न केवलं सामान्यव्यवहारे अनुशासनस्यमहत्त्वमपितु राज्यसञ्चालने, राष्ट्रसंचालने, चानुशासनगौरवमेव जागर्ति। सैनिकाः देशरक्षार्थं स्वात्मानं तृणवत्पातयन्ति न गणयन्ति दुःखपयोधि न स्मरन्ति प्रियशिशून् तत्रकारणमिदमेव यत्तेऽनुशासने स्थिताः सन्ति।

शिक्षायाः उद्देश्यम् जीवनस्य सर्व प्रकारेण उन्नतिकरम् अस्ति। उन्नतिः अनुशासनं बिना असम्भवः अतः अनुशासनं शिक्षायाः,

मुख्यम् लक्ष्यं कथ्यते अनुशासनेन बिना विद्यार्थिनः स्वगुरुणाम् आज्ञापालनं न करिष्यन्ति, अध्ययनं प्रति सावधानाः न भविष्यन्ति। अतस्ते शिक्षणकाले किमपि न ज्ञास्यन्ति। अतएव सत्यमुच्यते–अनुशासनम् एव शिक्षायाः मुख्यं लक्ष्यम्।

## ➡ (10) जननी जन्मभूमिश्च स्वर्गादपि गरीयसी

**अन्य शीर्षक**
- **देश सेवा**
- **देशभक्तिः**
- **स्वर्गादपि गरीयसी जन्मभूमि**

'जनयतीति जननी' इत्यन्वयार्थत्वात् जन्मदात्री एव जननी कथ्यते। जन्मनः भूमिरित्यर्थत्वात् जन्मग्रहणभूमिश्च जन्मभूमिर्भवति। उभे अपि जयायस्यौ इति हि अस्याः सूक्ते अर्थः स्वर्ग पावनः पूज्यः सुखप्रदश्चादि। त्रिष्वपि गुणेषु जननी जन्मभूमिश्च स्वर्गादपि गुरुतरे भवतः इत्यत्र मनागपि सन्देहो नास्ति।

पावनत्वम् पावयति पवित्रता सम्पादयतीति पावनः कथ्यते। जननी हृदयः पुत्रं प्रति या स्नेहधारा प्रवहति स त्रैलोक्यपावनी गंगेव पुत्रहृदयं घृणाद्वेषादिदोषान् दूरीकृत्य पावयति इति तु आधुनिकः बालमनोविज्ञानाचार्यः सिद्धकृतम् मातृस्नेहहीनाः बालकाः प्रायेण जीवने अपराधिनः भवन्ति। अतः जननी स्वर्गादपि पावनतरा वर्तते।

जननी पुत्र पालने असंख्यान् क्लेशान् सहते स्वयं आर्द्रवस्त्रेषु शयित्वा स्वपुत्रं शुष्कवस्त्रेषु शाययति। स्वयं बुभुक्षिताऽपि सती पूर्व भोजयति अतः सा सर्वथा पूजनीयां सुखपदत्वम् मातुः' अङ्के यत् सुखं प्राप्यते, तत्सुखम् कुत्रापि न लभ्यते। पशु पक्षिणोऽपि मातुः अङ्के आनन्दातिरेकम् अनुभवन्ति, किम्पुनः मानवाः।

यथा जन्मदात्री जननी वन्दनीया तथैव जन्मभूमिरपि सर्वैः अभिनन्दनीया स्पृहणीया च जन्मभूमिं प्रति मानवस्य स्वाभाविकं प्रेम जन्मतः एव भवति। ये स्वजन्मभूमिं प्रति अनुरागं रक्षन्ति ते धन्या सन्ति। विरला एव पुरुषाः जन्मभूमिं प्रति अनुरागहीनाः भवन्ति। ईदृशाः जनाः कृतघ्नाः राक्षसाः वा भवेयुः। वेदेषु पुराणेषु जन्मभूमेरत्यन्तं महत्त्वं दृश्यते। देवानां जन्म भारत-भूमौ समभवत्। अतएव देवाः अपि तस्य महिमानं गायन्ति। स्वातन्त्र्य संग्रामे तु असंख्याः देशभक्ताः स्वमातृभूमिप्रेमणिश्च भारतभूम्या अवतारं गृहीतवन्तः। महाराज्ञी लक्ष्मीबाई, तात्यां टोपे, तिलक, मालवीय, पटेल, सुभाष, गान्धी, मोतीलाल, जवाहर, भगतसिंह, महाभागानां स्वदेशभक्तिं दर्शं दर्शं विस्मिताः व्याकुलाः सन्तः आंग्लाः भारतं विहाय स्वदेशं प्रति प्रस्थानमकुर्वन्। सखेदं लिख्यते यदद्य तु, भारतभूमे, कतिपयाः पुत्राः स्वमातरं स्वबन्धुरक्तेन रञ्जयन्ति। तेऽद्य निर्दोष जनानां कदनं कुर्वन्ति। ये पूर्वं रक्षकाः आसन् ते साम्प्रतं राक्षसायन्ते, असुरायन्ते च जन्मभूमिं विखण्डयितुं प्रयतन्ते।

ऋषीणां देश रामकृष्णयोः जन्मभूम्यां कीदृशीयं विडम्बना यद् भ्राता एव स्वभ्रातुः शत्रुः सञ्जातोऽस्ति, 'अतएव जननी जन्मभूमिश्च स्वर्गादपि गरीयसी' इतीमां वाणीमुद्घोषयितारम् ऋषिवरं बाल्मीकिं वयं कथङ्कारं प्रसादयितुं शक्ष्यामः। तथापि स्वमनसि नैराश्यं नैवानेयम्। विपत्तिकाले धैर्यमवलम्बनीयम्। स्वमातरं जन्मभूमिं भारतवर्षं प्रति मनसा वाचा कर्मणा सद्भक्तिरेव आचरणीया।

## ➡ (11) सदाचारः

[2014 CU, 19 DB, 20 ZO, ZR, ZT]

**अन्य शीर्षक**
- **आचारः प्रथमो धर्मः** [2010 CI]
- **शीलं परं भूषणम्**
- **आचारः परमो धर्मः** [2010 CJ, 17 NL, 18 BN, 19 CZ, DA, DC, DE]

सत् आचरणमेव सदाचारः कथ्यते। यथा सत्पुरुषाः आचरन्ति तथैव आचरणमपि सदाचारः उच्यते। उत्तमजीवनस्य सर्वोत्तमं साधनं सदाचार एव अस्ति। सदाचारवान् नरः सुखं प्राप्नोति। स धार्मिको, बुद्धिमान् दीर्घायुश्च भवति। सदाचारस्य अन्याः बहवः गुणाः सन्ति। यथा माता पितरौ गुरूणां च आज्ञायाः पालनं वन्दनं च अहिंसा, परोपकारः, नम्रता, दयादयश्च। सत्यमेव उक्तम्

**आचाराल्लभते ह्यायुराचारादीप्सिताः प्रजाः।**
**आचाराद्धनमक्षय्यमाचारो हन्त्यलक्षणम्।।**

सामाजिकोत्थानाय सदाचारस्य महती आवश्यकता वर्तते। यः जनः सत्यं वदति, नित्यं माता-पितरौ अभिवादयति, गुरुजनानाम् आदरं करोति, परोपकारं च करोति, तस्य जनस्य आयुर्विद्यादि वद्धन्ते।

**अभिवादनशीलस्य नृत्यं वृद्धोपसेविनः।**
**चत्वारि तस्य वर्धन्ते आयुर्विद्या यशोबलम्॥**

मूर्खाणामेव जीवनं सदाचारविहीनं भवति। सोऽल्पायुः भवति तस्य सर्वत्र निरादरो भवति। आचारहीनः पुरुषः धर्महीनः पुण्यहीनश्च भवति। सदाचारेण नरस्य आदरो भवति। जगति तस्य प्रतिष्ठा भवति। अस्माकं देशे काले-काले बहवः सदाचारिणोऽभवन्। सदाचारेण श्रीरामचन्द्रः मर्यादा पुरुषोत्तमोऽभवत् राणासेतारादयोपि सदाचारिणः आसन्। सदाचारेण मानवः राष्ट्रस्य समाजस्य च कल्याणं कर्तुं शक्नोति। अतोऽस्माभिः सदाचारस्य पालनं कर्तव्यम् मनुनाप्युक्तम्–

**सर्वलक्षणहीनोऽपि यः सदाचारवान् नरः।**
**श्रद्धानोऽनसूयश्च शतं वर्षाणि जीवति॥**

## ➠ (12) अस्माकं विद्यालयः

[2012 HF, 13 BN, 14 CV, 19 CZ, 20 ZT, ZU]

**अन्य शीर्षक**

- **अस्माकं महाविद्यालयः** [2011 IA]
- **मम विद्यालयः**

मानवः स्वभावतः एव जिज्ञासुः वर्तते। जिज्ञासमाना एव मानवः किमपि कर्तुं समर्थाः। ज्ञान-पिपासां प्रशमयिमेव मानवै विविधाः प्रयासाः कृताः। मानवप्रयासपरिणितिरेव विद्यालयानां संस्थापना। एतादृशानां प्रयासानामेव फलमस्ति मम विद्यालयः तत्र वयं ग्रामीणाः छात्रां विद्याध्ययनं कुर्मः। मम विद्यालयः नगरस्य पूर्वस्यां दिशि स्थितः, अयम् च नगरस्य श्रेष्ठः विद्यालयः अस्ति।

मम विद्यालये सप्तत्रिंशत् कक्षाः द्वेसहस्रे छात्राः च सन्ति। विद्यालये एकः विशालः कक्षः अस्ति, अस्मिन् कक्षे विद्यालयस्य विभिन्नोत्सवानाम् आयोजयन्ति। अस्माकं विद्यालयस्य विशालं सुन्दरं च भवनं दर्शकानां चेतांसि हरति। विज्ञान-कलादीनां पृथक्-पृथक् सुशोभनाः कक्षाः विद्यन्ते। मम विद्यालये एकः पुस्तकालयः अस्ति। अत्र एकः वाचनालयः, षड् प्रयोगशालाः च सन्ति। विद्यालयस्य मध्ये सुशोभनम् उपवनं, विशाल क्रीडाङ्गनं जलधारा यन्त्रम् च सन्ति। मम विद्यालये एकोनत्रिंशत् अध्यापकाः सन्ति।

मम विद्यालयस्य प्रधानाचार्यः पूज्यपाद; श्री यज्ञदत्तः विविध विषयेषु पारङ्गतः, परन्तु संस्कृत विषये तु तस्याधिकार एव। सः एकः व्यवहारकुशलशीलवान् विनयसम्पन्नः सफलवक्ता प्रधानाचार्यः अस्ति। मम विद्यालयस्य अध्यापकाः विविधविद्याप्रवीणाः सन्ति। सर्वे एव स्व-स्व विषये पारङ्गताः सन्ति। अत्र न केवलं पठनं-पाठनं च भवति, अपितु सदाचारस्य पाठोऽपि पाठ्यते, देशभक्तेः समाजसेवाः, च भावाः अपि छात्राः गृहण्न्ति।

अस्मिन् विद्यालये एन.सी.सी., बालचरशिक्षायाः अपि सुप्रबन्धोऽस्ति। ते छात्राः क्रीडनादि प्रतियोगितासु प्रथमं स्थानं प्राप्नुवन्ति, ते पुरस्कारादिकमपि लभन्ये। साम्प्रतम् अस्माकम् एतत् कर्त्तव्यमस्ति यत् वयं विद्यालयस्य कीर्ति सर्वतः प्रसारयितुं प्रयतेम।

## ➠ (13) सत्यमेव जयते नानृतम्

[2012 HG, 17 NP]

**अन्य शीर्षक**

- **न हि सत्यात्परोधर्मः**
- **सत्ये सर्वं प्रतिष्ठितम्** (2017 NN)

मानवधर्मस्य सारभूतं तत्त्वम् इदं सत्यं किमस्ति? किमस्य स्वरूपमिति जिज्ञासायां भारतीयाः वैज्ञानिकाः ऋषयः कथयन्ति यद् आत्मनः स्वरूपमेव सत्यम्। अथवा ईश्वरस्य वा परमसत्तायाः स्वभाव एक सत्यम्। अथवा विविधरूपवत्यां प्रकृत्यां यः शाश्वतः वा सनातनः नियमः स एव सत्यम् वा ऋतमिति कथ्यते। ईश्वरः सत्येनैव जगतः निर्माणं करोति। अनेनैव इदं पालयति अन्ते सत्येन एव जगत् संहरति। इत्थं परमेश्वरस्य जगतः निर्माणपालनं संहारकार्येषु सत्यमेव सहायकं भवति। दयानन्देन सत्यमेव

कथितम् – 'सत्याचरणमेव धर्मः' जगतः प्रतिष्ठा सत्यम्। विधानं साधनं वा सत्यम् साध्यं सत्यम्।

प्रकृतिः अपि ईश्वरस्य सत्यविधानं पालयन्ती दृश्यते। सूर्यः, चन्द्रः, ग्रहनक्षत्रादयः सत्यमेव पालयन्ति। ते सत्यधर्मात् अणुमात्रमपि नैव विचलन्ति। नद्यः पर्वताश्च सर्वे सत्यपरायणाः सन्ति। सूर्यः प्राचीं दिशं विहाय कदापि अन्यास्यां दिशायां नो उदयते तस्येयं सत्यनिष्ठास्ति। गन्धवती पृथिवी कदापि रसवती न भवति। इदमेव तस्याः सत्याचरणम्।

भारतीय संस्कृतेः विशेषतासु सत्यं प्रथमं परिगण्यते। ततः परंशिवं सुन्दरञ्च अथवा अन्यानि तत्त्वानि समायान्ति। सत्यस्य पालने पूर्वं कष्टानि आगच्छन्ति। परन्तु यः धैर्येण तानि सहते सः परिणामे अमृतं लभते। हरिश्चन्द्रादयः सत्यं पालयन्तः व्यवहरन्तः च परमसत्यरूपं नारायणं साक्षात्कृतवन्तः।

किमधिकं सत्येन एव संसारः प्रचलति। सत्याभावे अस्य अस्तित्वं नश्यति सत्यस्य पालकाः कदापि पराजयं न लभन्ते। अतएव उक्तम् —

**'सत्यमेव जयते नानृतम्'**

## ➡ (14) विश्वशान्ति

संसारे न केवलं मनुष्याः अपितु सर्वे प्राणिनः शान्तिं कामयन्ते। कोऽपि दुःखं कष्टं वा नैव बाधति। अनेन स्पष्टं प्रतीयते यद् विश्वशान्तिभावना प्राणिषु स्वाभाविकी वर्तते। वेदाः भणन्ति — "मित्रस्य चक्षुषा समीक्षामहे", "मा गृधः कस्यस्विद्धनम्"। सर्वेषामीश्वरप्रार्थनायां विश्वशान्तिकामना प्राप्यते।

भारतस्य सर्वे दार्शनिकाः विश्वशान्त्यर्थं प्रयतमानाः दृश्यन्ते। इमे चिरशान्ते उपायान् अनेकधा वदन्ति। यथा भगवतः बुद्धस्य वाणी विश्वशान्ति भावपूता प्राणिनां शान्त्यर्थमेव प्रवृत्ता सती दृश्यते। तीर्थङ्कराणां जैनमुनीनां सर्वे उद्योगाः एतदर्थमेव सम्भूताः। एवं सत्यपि विश्वशान्तिरवः नैव अनुश्रूयते। स्त्रीबालहत्यादिकं, बलात्कारः श्रूयन्तेऽहर्निशं दृश्यन्ते च समाचारपत्रेषु प्रायशः; अवलोक्यन्ते इत्थमत्र संसारे विग्रहस्य वातावरणं प्रबलमास्तै। सः मनुष्यविनाशाय घातकानि अस्त्राणि निर्मिते प्रयुङ्क्ते च। अणुबम्ब-हाइड्रोजन बम्ब-आविष्कारैः एवंविधैः विश्वस्य वातावरणं संकटग्रस्तमशान्तिमयं वा सञ्जातम् अस्ति। अतएव अन्यानि राष्ट्राणि शान्त्यर्थं तृषितनेत्रैः भारतं प्रति अवलोकयन्ति। अतः मनुष्यतारक्षायै भारतीय मनुष्यैः गम्भीरतया चिन्तनीयम्। अस्मिन् भोगप्रधानं भौतिकवादे मानवजीवनस्य एकस्यैव पक्षस्य उन्नतिः भवति। परिपूर्णः विकासस्तु आध्यात्मिकीमुन्नतिं बिना न सम्भविष्यति। अतः चिरशान्त्यर्थम् आध्यात्मिकः विकासः कर्तव्यः। अनेन समग्रेऽपि विश्वे शान्तिः आगमिष्यति।

भारतेन स्वातन्त्र्यप्राप्तेः पश्चात् विश्वशान्तिदिशायां बहवः प्रयत्नाः विहिताः। भूतपूर्व प्रधानमन्त्रिणा जवाहर लाल नेहरू महोदयेन अनेक बारं संसारः युद्धविभीषिकातः संरक्षितः। भारतस्य वर्तमानशासनमपि घोषयति यत् अस्माभिः अणुशक्तिः मानवोपयोगिषु कार्येषु एव प्रयोज्या, मानवविनाशाय नैव विश्वशान्तेः प्रश्न, सम्पूर्णमानवतायाः प्रश्नः अस्ति। अतएव विश्वस्य समस्तैरेव मनुष्यैः अस्मिन् विषये भृशं चिन्तनीयम् तदनु आचरणीयम् भारतदेशः विषयेऽस्मिन् विशुद्धां भूमिकां निर्वोढुं शक्नोति चेत्सःभौतिकवादं प्रति आकर्षणं परित्यज्य आध्यात्मिकोन्नतिं स्वजीवनस्य परममुद्देश्यं निर्धारयेत्।

## ➡ (15) अस्माकं देशः

[2017 NP, 19 DE, 20 ZO, ZR, ZS]

**अन्य शीर्षक**

- **भारतवर्षम्**
- **महान् देशः**
- **भारत वैशिष्ट्यम्**
- **प्रियं भारतम्**
- **भारत राष्ट्रगौरवम्** [2010 CG]
- **विश्वगुरुः भारतदेशः** [2014 CV]

भारतम् अस्माकम् देशः अस्तिः। पर्वतानाम् राजा हिमालयः अस्य देशस्य प्रधानः पर्वतः अस्ति। सः अस्य उत्तरे मुकुटमणिरिव शोभते। रत्नाकरः सदा अस्य चरणौ प्रक्षालयति। ब्रह्मपुत्र गंगा-यमुना-सिन्धु-नर्मदा महानद्यादिनद्यः अस्य हृदयम् सिञ्चन्ति। अस्य प्राकृतिकी शोभा अनुपमा अस्ति। अत्र पण्णाम् सुन्दरः क्रमः अस्ति। चित्र विचित्रवर्णशाली सुगन्धपुष्पाणि बसन्ते संसारे अन्यत्र नास्ति। शरदृतोः दुग्ध धवला चन्द्रिका अन्यत्र कुत्रास्ति न।

अत्रत्य साहित्य दर्शनज्योतिषारायुर्वेदादीनि विश्वस्य प्राचीनतमानि साहित्यदर्शन-विज्ञानानि सन्ति। अत्रत्यऋग्वेदः विश्वस्य प्राचीनतमः लिखितग्रन्थः अस्ति। अत्रत्या संस्कृतिः विश्वस्य प्राचीनतमा संस्कृतिः अस्ति। वयमीदृशेसर्वश्रेष्ठ देशे जन्म लब्ध्वा धन्याः स्मः। इयं रमणीया भारतभूमिः धन्या। अस्या महिमा सर्वविदिता एव–

**'धन्योऽयं भारत देशो धन्येयं सुरभारती।**
**तदुपासकाः वयं धन्याः अहो धन्यपरम्परा॥'**

इयं खलु भारतभूमिः भगवतो नारायणस्य प्रियालीला स्थली बुद्ध-दयानन्द सदृशाः महात्मानः, कालिदास-भवभूति सदृशाः कवयश्च इमाम् एव भूमिं स्वजन्मना अलंचक्रुः। अस्मिन् देशे विविध-धर्मावलम्बिनः, विविध वेश-भूषा धारिणः, विविध भाषा भाषिणः जनाः वसन्ति। एतत् एव अस्माकं देशस्य महत् वैशिष्ट्यम् अस्ति।

"वसुधैव कुटुम्बकम्" इत्यादि वेदोक्तवाक्यकदम्ब साफल्याय भगवता महात्मा बुद्धरूपेणावतारो गृहीतः। महात्मना बुद्धेनाखिले संसारे विश्वबन्धुत्वभावना प्रकटिता प्रेम व्यवहारश्च स्थापितः। अद्यापि जापान चीन-तिब्बतादि प्रदेशेषु बुद्ध ईश्वरवत् पूजितो विद्यते। गंगा-यमुना सरस्वति प्रभृतयः नद्यः स्वमधुर जलेन भारतवासिजनान् तर्पयन्ति हिमालयसदृशाः अगम्याः पर्वताः दुर्ग इव अत्र राजन्ते।

## ➡ (16) परोपकारः

[2011 IC, 13 BM, BL, 14 CU, 19 DB, DC, 20 ZT]

**अन्य शीर्षक**

- **परोपकाराय सतां विभूतयः** [2014 CY]
- **परोपकारस्य महत्त्वम्**
- **परोपकारः पुण्याय** [2010 CH]

परेषाम् उपकारमेव 'परोपकारः' इति कथ्यते। कतिपयाः पुरुषाः स्वार्थमेव सर्वप्रधानं गणयन्ति परेषां कृते किंचित् न कुर्वन्ति, परन्तु सर्वे एतादृशाः न सन्ति। केचन् महापुरुषाः परोपकारिणः भवन्ति। परोपकारमाचरतोऽप्यन्तःकरणे कश्चिदवर्णनीयः सन्तोषः समुत्पद्यते। परोपकारेणात्मा शान्तिं प्राप्नोति। सज्जनाः परोपकारेणैव प्रसन्नाः भवन्ति। परोपकारेणैव हृदयं पवित्रं सदयश्च भवति। परोपकारः हिन्दुसभ्यतायाः प्रधानमङ्गमस्ति। प्राचीनकालात् हिन्दुजातौ प्रसिद्धाः परोपकारशीला महानुभावाः अभवन्।

महान् परोपकारी दधीचिः आसीत्। स वृत्रासुर वधार्थं स्वअस्थीन्यपि अददात्। महाराजः शिवः कपोतरक्षार्थं स्वमासं श्येनाय प्रादात्। आधुनिकयुगे जवाहरलालनेहरूमहोदयः सर्वान् स्वार्थान् विहाय स्वदेशवासिनां हिताय प्रयत्नं कुर्वन् स्वजीवनमपि अमुञ्चत्। लोकोपकारः परोपकारिणां स्वभावसिद्धो धर्म इति। परोपकाराय दिनकरः तपति। नद्यो वहन्ति, मेघाः वर्षन्ति, चन्द्रो विराजते। परोपकारेणैव नूनं शरीरस्य शोभा भवति। कायक्लेशमनुभूयापि सन्तः करुणापराः परेषामुपकारमाचरन्ति। परोपकारिणः जना एव तडाग कूपादीन् खानयन्ति, उद्यानानि आरोपयन्ति, धर्मशालां पाठशालां च निर्मापयन्ति। अतः कथयितुं शक्यते यत् परोपकार भावनया एव अस्माकं, अस्माकं देशस्य वासिनाम् कल्याणं भवति। परोपकार भावनैव अस्माकं देशस्य च कल्याणः भवितुं शक्यते।

## ➡ (17) वर्षाकालः

**अन्य शीर्षक**

- **वर्षावर्णनम्**
- **वर्षर्तुः** [2016 TM, 18 BN]

विश्वे अनेकाः ऋतवः भवन्ति, किन्तु भारतवर्षे षड्ऋतवः प्रमुखाः भवन्ति। तेसां नामानि– बसन्तः, ग्रीष्मः, वर्षा, शरद, हेमन्तः,

शिशिरः सन्ति। एषु ऋतुषु वर्षर्तोः अति महत्त्वम् अस्ति। यतोहि भारतदेशः एकः कृषिप्रधानदेशः अस्ति। भारतवर्षस्य कृषकाः वर्षर्तौ एव निर्भराः भवन्ति।

वर्षासु क्वचित् मेघाच्छन्नम् आकाशं घनान्धकारयुक्तं क्वचिच्चेत् मेघनिर्मुक्तं च प्रकाशितं सत् अतिमनोहरं प्रतीयते कृष्णाकाशे उड्डीयमाना बकपङ्क्तिः नयनयोः आकर्षिका भवति। आकाशे इन्द्रधनुषोः दृश्यं कस्य चित्तं न हरति। उपवनानां क्षेत्राणां शोभा तु अपूर्वा दृश्यते। सर्वत्र हरीतिमा विराजते। एतत् प्रतीयते यत् पृथिव्या हरिच्छाटिका धृता। जलपूर्णाः नद्यश्च मनोरमा भवन्ति क्षेत्रेषु भूमिं कर्षन्तः कृषकाः अतितरां मोदन्ते। सुवृष्ट्या मानवस्य जीवनं निर्विघ्नं प्रचलति। फल-पुष्प-लता-पादपादि वनस्पतयः सुप्रसन्नतामभिव्यञ्जयन्ति सायं समये गावः वनात् प्रतिनिवृत्य गोष्ठमुपगच्छन्ति। वृक्षशाखासु दोलानन्दममन्दमनुभवन्ति च। व्रजस्थमन्दिरेषु 'घटाच्छटादर्शनम्' सज्जया प्रारभ्यते। वर्षाकाले यथा सर्वे प्रसन्नतामनुभवन्ति तथैव वर्षाभावे हा हा शब्दः सर्वत्र श्रूयते, जीवनोपयोगिवस्तूनामभावो भवति, परस्परं शत्रुवदाचरन्ति जनाः। अतएव वर्षाऋतूनां राज्ञी कथ्यते।

## ➡ (18) पर्यावरण सुरक्षा [2014 CS, 17 NM]

**अन्य शीर्षक**

- **पर्यावरण समस्या** [2011 IB, 15 TO]
- **पर्यावरणम्**
- **पर्यावरणस्य महत्त्वम्** [2013 BP, 20 ZR]
- **पर्यावरणस्य संरक्षणोपायाः** [2010 CI, CK]
- **पर्यावरणस्य सुरक्षायाः महत्त्वम्**
- **पर्यावरण रक्षणम्** [2010 CH, CJ, 13 BL, 15 DU, DT]
- **पर्यावरण शुद्धिः**
- **पर्यावरण-संरक्षण आवश्यकता।** [2012 HH]
- **पर्यावरण-संरक्षणम्।** [2014 CT, CU, 17 NK, 18 BN, 19 DE, 20 ZP]
- **पर्यावरण-प्रदूषणम्।** [2019 DA, 20 ZS]

प्रकृत्या; तत्त्वजातं परितः आवृत्य संस्थितम्, अतः कारणात् तत्पर्यावरणं कथ्यते। कस्यपि देशस्य प्राकृतिक यद् वातावरणम्, तदैव तद् देशस्य पर्यावरणमुच्यते। मृत्स्ना-जलवायु-वनस्पति-खग-कीट-पतङ्ग जीवाणवः एते पर्यावरणस्य घटकाः सन्ति। सम्प्रति वैज्ञानिके युगे नवीनानाम् उद्योगानां विकासात् पर्यावरणम् असन्तुलित विकृतं च अभवत् । उद्योगशालाभ्यः निःसृतं दूषित जलं तत्परिवेषं दूषयति। दूषितं जलं प्रवहत् नद्याः जलमपि विकारयति। कोलाहलेनापि पर्यावरणे बहवो दोषाः समुत्पाद्यन्ते।

मानवः अविवेकेन सलिलासु नदीषु मूत्रादिकं मालिन्यम्, औद्योगिकं रासायनिकं जल शवान् च प्रवाहयति सर्वमेतत् अतिभीतिकर प्रदूषणं कुरुते, येन पेय जलं विषाक्तं भवति। परमाणु परीक्षणैः उद्योगशालायां तापैश्च महती ताप विकृतिः क्रियते। येन मानवः प्राणहराः दोषा प्रजायन्ते।

प्रदूषणं शोधयितुं शासनेन महान्तः प्रयासाः क्रियन्ते। वृक्षारोपणैः संरक्षणैश्च पर्यावरणं शुद्धः भवति। अस्माभिरपि पर्यावरणं शोधयितुं यथाशक्यं प्रयासः कर्त्तव्यः। पर्यावरणे शुद्धं जाते वयं सुखेन जीवितुं शक्नुमः।

## ➡ (19) आधुनिक समाजे नारीणां स्थितिः [2017 NJ]

भारतीय संस्कृतौ नारीणां समुन्नतं स्थानं सर्वैः स्वीक्रियते। अन्यासु संस्कृतिषु नारीणां एतादृशं स्थानं नासीत् यथा भारतीय संस्कृतौ नारीणां मिलति। ''यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः'' सर्वत्र भारतवर्षे व्यापकरूपेण हृदयेषु रमते। वेदानामाध्यात्मिकतायाः भावनायाः विस्तार उपनिषत्सु विद्यते। उपनिषत्सु वरिष्ठ मुनीनां चर्चा प्रसङ्गे कात्यायनी, मैत्रेयी, गार्गी, वाचक्नवी, अपाला प्रभृतीनां गूढ विषयसन्दर्भे समुल्लेखः प्रमाणयति यत् नारीणां कीदृशः स्थानं तत्समयेऽत्रदेशे आसीत्। तत्र युगे गुरुकुले नारीणां

विद्याऽध्ययनव्यवस्था आसीत्। जीवनावधि ब्रह्मचर्याश्रमव्यवस्थापि समुचितासीत्। तपस्विनीनां जीवनप्रसङ्गे पुराणेषु कथा बाहुल्यं विद्यते। नारीदत्तोपदेशानां महत्त्वमपि साहित्ये विशिष्टं स्थानं भजते।

धार्मिकेषु आयोजनेषु, सामाजिकेषु कार्येषु, राजनैतिक जीवनेषु नारीस्थान सर्वथासुरक्षितमद्यापि विद्यते। भ्राता स्वसुः पूजनं करोति देवीवत्। पिता कन्यादानं करोति ब्रह्मलोकं प्राप्यते। अन्येऽपि हिंसकाः नारी स्थानं सर्वथैवमन्यते किं पुनः साधवः। अतः भारतीय संस्कृतौ नारीणां परमोच्चस्थानं विद्यते।

## ➡ (20) विज्ञानस्य चमत्कारः [2019 DF]

**अन्य शीर्षक**

- **विज्ञानम्**

वर्तमान युगे विज्ञानेन समुन्नति शिखरं चुम्बितम्। अतः वर्तमान युगं वैज्ञानिकयुगम् इति अभिधीयते। पुरा यात्राकरणं, समाचारसम्प्रेषणं, समाचार-ज्ञानञ्च सुदुर्लभमेव आसीत्। परमिदानीं तु द्विचक्रयानेन, मोटर शकटि वायुयानेन च यात्रां कुर्मो वयम्। दूरभाष, 'बेतार का तार' दूर श्रवण इत्याख्य यन्त्रेण च स्वल्पेनैव समये दूरतोऽपि वार्ता प्राप्तेऽस्याभिः। शीघ्रगामी जलयानेन च समुद्रस्य वक्षस्थलं विदीर्णयन् शीघ्रमेव समुद्रयात्रापि कर्तुं सक्षमः मानवः। दूरदर्शकयंत्रेण-सुदूरस्थितानामपि पदार्थानां समीपे तु, दर्शनं विज्ञानस्यैवोपहारम्। वार्तासंप्रेषणस्य साधनमपि विज्ञानेन प्रदत्तमस्ति, वर्तमानकाले तु 'तार द्वारा' क्षणेषु समाचार; प्रेषितुं शक्यते। 'दूरभाष' साहाय्येन च एकदेशस्य मानवः अन्य देशीय जनैः सह वार्ता कर्तुं पार्यते। 'रेडियो' यन्त्रेण विभिन्न मनोरञ्जनस्य सामग्री तु प्राप्यत एव सहैव अनेक नवीन समाचाराणामपि परिज्ञानं भवति। चित्रपटेषु संचरन् नरनारीणां चित्रं मेवानां गर्जनं, प्रदेशस्य शस्यश्यामला भूमिः, बालभास्मरस्योदयंः निशायाश्च कालिमा सदैव दर्शकानां मनांसि बलादेव सम्मोहयन्ति चित्तमनुरञ्जयन्ति च। अहो धन्यमिदं विज्ञानं येन प्रदत्तमेतादशाश्चर्यमयं पदार्थम्। मुद्रण यन्त्रस्य साहाय्येन पुस्तकानां मुद्रण-सौकर्येण विविधाध्ययन सामग्री जनैः सम्प्राप्यते। प्रतिदिनं समाचार पत्राणि मुद्रणयन्त्रेणैव मुद्रितानि भवन्ति।

चिकित्साक्षेत्रे तु विज्ञानस्य साफल्यं दृष्ट्वा आश्चर्यस्य सीमाऽपि लघुः भवति। अनेकेषां रोगाणाम् इदानीम् नामापि नास्ति। प्रायशःय सर्वेणमपि अंगानां परिवर्तन शल्य चिकित्सकैः क्रियते। एक्सरे साधनेन आन्तरिकाणामङ्गानां विकाराणां विषये परिज्ञानं चिकित्सकैः क्रियते। 'डायनामाइट' साधनेन विशालोपत्यकां खण्डाकारं करोति।

## ➡ (21) महात्मा गाँधी

**अन्य शीर्षक**

- **कश्चित् महापुरुषस्य वर्णनम्** [2017 NJ]

महात्मा गांधी भारतस्य स्वतन्त्रता-संग्रामस्य एकः कुशलः सेनापतिः आसीत्। सः जगतः जनेषु वन्दनीयेषु महापुरुषेषु अग्रगण्यः आसीत्। महात्मा गांधी एकः सदाचारशीलः सत्यनिष्ठः देशभक्तश्च महापुरुषः आसीत्। अयं समाजसुधारकोऽपि आसीत्। गान्धिमहाभागस्य जन्म सौराष्ट्र देशस्य पोरबन्दर नगरे एकोनसप्तयधिकाष्टादश शततमे ईस्वीयाब्दे अक्टूबरमासस्य द्वितारिकायां पुतलीबाईदेव्याः दक्षिणकुक्षिते अभवत्। अस्य पितुः नाम 'करमचन्द' गान्धी आसीत्।

अस्य सहधर्मिणी कस्तूरबाबाई आसीत्। राजकोटे भावनगरे च अनेन महात्मना शिक्षा प्राप्ता। अस्य पूर्णनाम मोहनदासः करमचन्दः गान्धी आसीत्। बाल्यकाले अयम् अतिनिपुणः छात्रः न आसीत्। सः वैरिस्टरी नाम्नी परीक्षां इंग्लैण्डदेशे समुत्तीर्य भारतं प्रत्यावर्तत। दक्षिणाफ्रीकादेशस्थ भारतीयानां दुर्दशादर्शनमात्रेण अस्य हृदयपरिवर्तनं जातं। तेषाम् उद्धारार्थं सत्याग्रहयुद्धः अहिंसात्मकः तत्राभवत्। भारतीय कांग्रेससभायां सम्मिलितो भूत्वा गान्धी महोदयः असहयोग आन्दोलनमपि अचालयत्। महात्मनः नेतृत्वे 1930 ईस्वीये कांग्रेसेन पूर्णस्वतन्त्रतायाः प्रस्तावः सर्वसम्मत्या स्वीकृतः। सन् 1947 वर्षे देशोऽयं स्वतन्त्रतां प्राप। अन्ततः अहिंसात्मकेन आन्दोलनेन एव सः भारतं परतन्त्रतापाशात् स्वतन्त्रम् अकरोत्।

## ➡ (22) महाकवि कालिदासः

[2011 IC, 12 HD, HJ, 13 BJ, 14 CX, 17 NO, 18 BN]

**अन्य शीर्षक**

- **संस्कृत श्रेष्ठः कविः** [2016 TK]
- **कोऽपि कविः**
- **कश्चित् प्रेयान् कविः** [2011 IB]
- **मम् प्रिय (प्रेयान्) कविः** [2016 TM, 20 ZO]
- **उपमा कालिदासस्य** [2010 CH, 17 NL]

कालिदासोऽस्माकं देशस्य राष्ट्रियः कविः आसीत्। भारतीयसंस्कृत्याः सभ्यतायाश्च प्रतीकःकालिदासः देशप्रसिद्धो महाकविरभूत्। आदौ कालिदासः महामूर्खः आसीत्। तस्य विद्योत्तमा नाम्नी विदुषी भार्यासीत्। पत्न्या अनादरेण दुःखितः कालिदासः कालिदेव्याः आराधनमकरोत्। अथ देव्याः वरं प्राप्य स महाकविरभूत्।

**पुरा कवीनां गणना प्रसंगे कनिष्ठिकाधिष्ठित कालिदासः।**
**अद्यापि तत्तुल्यकवेरभावादनामिका सार्थवतीः बभूव॥**

कालिदासस्य रचनासु संस्कृतकाव्यशैल्याश्चारुतमं रूपं विद्यते। रघुवंशकुमारसंभवौ महाकाव्ये स्तः। ऋतुसंहारः मेघदूतश्च गीतिकाव्ये। अभिज्ञानशाकुन्तलं, विक्रमोवर्शीयं मालविकाग्निमित्रं च त्रीणि नाटकानि सन्ति। पाश्चात्य महाकविगेटे महोदयः कालिदासस्य 'अभिज्ञान-शाकुन्तलम्' सर्वश्रेष्ठ नाटकेषु गण्यतेस्म। नाटकमिदं न केवलं संस्कृतनाटकेषु अपितु विश्वनाटकेषु सर्वोत्कृष्टं पदं भजते। सप्तांकमिदं नाटकं सहृदयैः नितरां पठ्यते, अभिनीयते स्मर्यते च।

कुमारसम्भवं महाकाव्यं कलादृष्ट्या कालिदासस्य मनोहरा सृष्टिरस्ति। रघुवंशोऽप्येकमुत्कृष्टं महाकाव्यम् तथा मेघदूतोऽप्यतिरमणीयं गीतिकाव्यमस्ति। कालिदासः शृङ्गाररसप्रधानकविस्तथा प्रकृत्याः प्रवीणपूजकः आसीत्। तस्य प्रकृतिवर्णने निरीक्षकस्य नवीनकल्पनायाः कमनीयता चास्ति। स स्त्रीसौन्दर्यस्य साम्यं प्रकृत्या सह अकरोत्।

कविकालिदासः स्वजीवनवृत्तविषये स्वनिर्मितेषु ग्रन्थेषु किंचिदपि न लिलेख परं सर्वत्र प्रसिद्धाभिराख्यायिकाभिः अस्य कवेर्नाम उज्जयिनी नगरीवास्तव्यविक्रमादित्येन सह सम्बद्धं विद्यते। उपमालङ्कारेणसह कालिदासस्य घनिष्ठः सम्बन्धः। अस्य रचनासु समासप्राचुर्यताभावः दीर्घसमासाभावश्च तथा सर्वा रचनाः प्रसाद गुणपूर्णाः स्पष्टाः सन्ति। उपमालंकारस्य सम्बन्धे तु इदं प्रसिद्धम्– 'उपमा कालिदासस्य'।

## ➡ (23) महाकविः बाणः

**अन्य शीर्षक**

- **वाणी बाणो बभूव हि**
- **मम प्रेयान् कविः**
- **बाणोच्छिष्टं जगत्सर्वम्**
- **बाणभट्टः** [2017 NN]
- **बाणस्तु पञ्चाननः** [2019 DA, 20 ZQ]

बाणभट्टस्य पितुः नाम चित्रभानुः मातुश्च राज्यदेवी आसीत्। जननानन्तरमेव अयं मातृसुखविहीनोऽभवत्। दौर्भाग्येन उपनयन संस्कारानन्तरमेव अयं पितृविहीनोऽपि जातः। बाणस्य पार्श्वे पैतृकं प्रचुरं धनमासीत्। मित्राणिनैकविधस्वभावकानि आसन् विद्वांसः चौराः, नर्तकाः, नटाः, ऐन्द्रजालिकादयः सर्वे बाणप्रिया आसन्। कालान्तरे स्वगुणैर्विद्वत्तया च बाणः हर्षदेवस्य राजकविर्जातः। हर्षवर्धनस्तं 'वश्यवाणीकविचक्रवर्ती' उपाधिनाऽभूषयत्। बाणभट्टस्य जन्मभूमिः प्रीतिकूटसमीपे आसीत्। ऐतिहासिकैरस्य कालः 450-480 ईस्वीयाब्द; स्वीकृतः। 'हर्षचरितम्' बाणस्य प्रथमा गद्यकृतिरस्ति। कल्पनाप्रचुरायां अलंकारपूरितायां शैल्यां तात्कालिकसामाजिक व्यवस्था, राजनीतिकादर्शदशा दर्शनीयैव। पितृव्यभ्रात्रा श्यामलेन हर्षचरिते श्रवणेऽभिरुचिः प्रकटिता तदा

बाणभट्टेन तं श्रावयितुं हर्षचरितं विरचितम्। अस्मिन् ग्रन्थे बाणेन स्वकीयं जीवनवृत्तं काव्यसौष्ठवपूर्वकं व्यरचि। राज्ञो हर्षवर्धनस्य चरितम् तस्य वैभवम्, प्रभावम् च जीवनादिमरणान्तं व्यरचयत्।

कादम्बर्यामवान्तरकथानामाधिक्यभवनेऽपि तस्याः नैसर्गिकविकासे नास्ति क्वचिदतिविरोधः। कादम्बरी मुख्या नायिका तस्याश्चर्चा ग्रन्थारम्भे न विद्यतेऽपि तु मध्ये कृता, अतः पाठकानामुत्तरोत्तरमुत्कण्ठा वर्धते। उपोद्घाते महाश्वेतायाः प्रणयकथा विद्यते, प्रारम्भे शूद्रकनृपतेः सभायामद्भुतेन शुकेन सह चाण्डालकन्यायाः प्रवेशः प्रदर्शितः।

'कादम्बरी' ग्रन्थस्य पात्राणि भूलोकतः स्वर्गलोकपर्यन्तं पर्यटन्ति। कथायां बाणवृत्तिस्तादृशी न रमते यादृशी— अप्रासंगिक वर्णनेषु तथापि तस्य पात्राणि व्यक्तित्वसहितानि सन्ति। शुकनासनामकमन्त्रिणश्चरित्रचित्रणम्, श्वेतवसनभूषितायाः, तपस्विकन्याः– महाश्वेतायाश्चरित्रचित्रणं कादम्बर्याश्चानुपमं स्वरूपवर्णनम् पाठकानां हृदये स्वप्रभावमङ्कयन्ति।

## ➡ (24) होलिकोत्सवः

[2011 IB, 13 BO, 15 DU, 16 TP, 19 DD]

**अन्य शीर्षक**
- **वसन्तोत्सवः** [2017 NO]
- **वसन्त-सुषमा** [2017 NM]

भारतवर्षे चतुर्षु प्रमुखतमेषु पर्वसु वा उत्सवेषु होलिकोत्सवः अथवा वसन्तोत्सवः हर्षेण जनमानसमान्दोलनयन्, उल्लासेन विह्वलयन्, प्रमोदेन नर्तयन्, शरीरेषु मनसु चाभिनवप्राणशक्तिं सञ्चारयन् प्रत्येकस्मिन् वर्षे फाल्गुनमासस्य पूर्णिमा तिथौ समागच्छति। भौगोलिकपरिस्थित्यनुसारं फाल्गुनमासः बसन्तर्तौ परिगण्यते। शिशिर ऋतोः शैत्याधिक्यानन्तरं समशीतोष्णवातावरणोपेतः फाल्गुनमासः समायाति मासेऽस्मिन् शैत्यस्य माधुर्यमनुभूयते। साम्प्रतं प्राकृतिक सौन्दर्यस्य प्राणिशरीरेषु नवाः प्राणाः सञ्चरन्ति। तेषु पल्लवाः सञ्जायन्ते। कवीनां कल्पना प्रखरा भवति। चित्रकाराणां तूलिका अभिनवचित्राणि रचयति। भगवता श्रीकृष्णेन तु गीतायाम् 'ऋतुनां कुसुमाकरः' इति उक्त्वा अस्य ऋतोः महत्त्वं प्रकटितम्। अतएव वसन्तः ऋतुराजः इति कथ्यते। वसन्तकाल एव मधुऋतुनाम्नाऽपि प्रसिद्धिं याति।

पौराणिकी मान्यताऽस्ति यत्प्रहलादः दैत्यराजस्य हिरण्यकशिपोः पुत्रः भगवतः विष्णोः परमभक्तः आसीत्। हिरण्यकशिपुः नितरां नास्तिकः पापिष्ठः, सर्वज्ञमानी, आत्मानमेव 'सर्वशक्तिमान्' इति अनुभवन् स्वपुत्रकृता भगवतः विष्णोः पूजामर्चनां कथमपि सोढुं नाशक्नोत्। तेन स्वपुत्रस्य हननार्थम् अनेके उपायाः कृताः, तथापि मृत्युः तमणुमात्रमपि न अस्पृशत्। अन्ते हिरण्यकशिपुः स्वस्वसारं होलिकामादिशत् यत्सा प्रह्लादं स्वाङ्केनिवेश्य अनले तिष्ठेत्। सः विश्वासमकरोत् यद् ब्रह्माणः वरप्रभावात् होलिका तु नैवः धक्ष्यति एवञ्च प्रह्लादः सर्वभावेन दग्धः भविष्यति, किन्तु भगवतः विष्णोः भक्ताय अनलः शीतलः अभवत् तथा होलिकादाहः जातः।

होलिकादाहस्य पश्चात् सर्वेजनाः होलिका स्थानं गच्छन्ति। होलिकां प्रणम्य परस्परं प्रेम्णा मिलन्ति, उरसा आलिङ्गन्ति च। प्रातः प्रतिपदायां प्रमोदोत्सवः समायोज्यते। परस्परं विविधाः रङ्गाः प्रक्षिप्यन्ते। सर्वथा भेदं विहाय स्त्रियः पुरुषान् नानावर्णैः रञ्जयन्ति। जनाः विजयामास्मिन् सेवन्ते, तदानीमुन्मत्ता इव प्रतीयन्ते। ब्रजस्य होलिकोत्सवः समग्रे एव भारते प्रसिद्धः। द्वितीयायां पुनः अभिनववसनैः परिधानैश्च विभूषिताः सन्तः स्वगृहेषु, प्रतिष्ठानेषु वा प्रमुखस्थलेषु अवतिष्ठन्ते। तत्र सर्वे वैरं विहाय मिलन्ति। अस्मिन् मिलनं नितरामावश्यकम्। वर्षाणां वैराणि दूरी भवन्ति तथा प्रेमपूर्ण व्यवहारे परिणमन्ति।

## ➡ (25) शरद् ऋतु

भारत देशः प्रकृतिकृपापात्रं वर्तते। अत्र प्रकृतिनटी सानन्दं रमते। भारतम् अलङ्कर्तुं षड्ऋतवः क्रमशः समायान्ति। सर्वे ऋतवः स्वं महत्त्वमधिकुर्वन्ति तेषु षड्ऋतुषु शरदृतुरपि एकः ऋतुरस्ति। ऋतुरयं मनोज्ञः, रमयः सुखदश्च वर्णितः। अयम् ऋतु आश्विनमासाद् आरम्भ आमासद्वयत् वर्तते।

अस्यारम्भे कासपुष्पाणां निर्मलता अतीव शोभते। नद्यः, तडागाः, सरोवराश्च निर्मलजलसनाथाः मनोहराः प्रतिभान्ति। मार्गाः

विपङ्का शोभन्ते। पक्वशालियुक्तानि क्षेत्राणि नेत्राणि आकर्षयन्ति। सपङ्कजाः सरोवराः अतीव राजन्ते। शरदः शोभा विलोक्य कवयः काव्यं सृजन्ति। अस्मिन् ऋतौ दिवसाः लघवः रजन्यश्च दीर्घाः भवन्ति। अत्र शाकानाम् फलानाञ्च आधिक्यं भवति। तानि स्वल्पमूल्येन उपलभ्यन्ते अतः निर्धनाः अपि तानि उपभोक्तुं शक्नुवन्ति। अयम् ऋतुः स्वास्थ्याय हितकरः भवति। कालिदासेन ऋतुरयमित्थं वर्णितः

**शरदि कुसुमसङ्गाद् वायवो वान्ति शीताः।**
**विगतजलदवृन्दाः दिग्विभागा मनोज्ञा॥**
**विगतकलुषमभः क्षीणपङ्का धरित्री।**
**विमलकिरणचन्द्रव्योमतारा विचित्रम्॥**

## ➡ (26) दीपावली

[2008 EU, 12 HE, 16 TM]

**अन्य शीर्षक**
- **दीपमालिका**
- **दीपोत्सवः** [2012 HH]

अस्माकं देशे भारतवर्षे बहवः उत्सवाः— धार्मिकाः, सामाजिकाः, राष्ट्रियाः केचिच्च महापुरुषजन्मोत्सवाः सन्ति। तेषु उत्सवेषु दीपावली-महोत्सवः, होलिकोत्सवः रक्षाबन्धनं, ईद, स्वतन्त्रता दिवसः गणतन्त्रदिवसः, गान्धीजयन्ती आदयः प्रमुखाः सन्ति। दीपमालिका हिन्दूनां एकतमः पवित्रतमः धार्मिक उत्सवः अस्ति।

कार्तिक मासस्य अमावस्यायां दीपावली महोत्सवः समायाति। भारते दीपावली— महोत्सवस्यैकं विशिष्टं महत्त्वम् विद्यते। सुप्रसिद्धेषु चतुः संख्याकेषु महोत्सवेषु वैश्य— वर्गस्यायं महोत्सव इति कथयन्ति जनाः। ब्राह्मणानां यथा श्रावणी पर्व, क्षत्रियाणां दशहरा पर्व, शूद्राणाम् होलिका पर्व, वैश्यानां तथैव दीपावली पर्व, किन्तु नेढं शास्त्रमर्यादायामवस्थितः सिद्धान्तः। दीपावल्याः कतिपय दिवसपूर्वमेव जनाः नगराणिग्रामाश्चालंकुर्वन्ति स्वच्छयन्ति च। गृहाणि सुधया धवली कुर्वन्ति, मनोहरैश्चित्रैरन्यैश्च भित्तिकादीन्यलंकुर्वन्ति। दीपावल्या महोत्सवः बलिराज्ये समभवत्। देव प्रार्थनया भगवता वामनावतारमाकलय्य बलिराज्यमङ्गी-कृतमासीत्। भविष्योत्तर पुराणे प्रमाणं विद्यते—

**पुरा वामनरूपेण प्रार्थयित्वा धरामिमाम्।**
**ददावतिथिरिन्द्राय बलिं पाताल-वासिनम्॥**

दीपमालिका महोत्सवे बालाः स्त्रियः युवकाः सर्वेऽपि प्रसन्नाः भवन्ति। दीपानां पङ्क्तयोऽपूर्वा कामपि शोभां दधते। मुम्बई प्रभृति वृहन्नगराणि च विद्युतोऽतिशयतेजसा देदीप्यमाना भवन्ति। अस्मिन् महामहनीये महोत्सवः एकः अपिस्थानं कृतवान्। केचन् मूर्खाः अस्मिन् दिने द्यूतक्रीडया अस्योत्सवस्य पवित्रतां दूषयन्ति स्वकीयं धनं विलोपयन्ति च। येऽत्रदिवसे द्यूतक्रीडया लक्ष्मीमधिगन्तुमीहन्ते ते कलङ्कभाजनानि सन्ति।

## ➡ (27) अहिंसा परमोधर्मः

[2010 CG, 11 IA, 13 BN, 14 CS, CT, CX, 16 TJ, 17 NJ, 19 DF]

'अहिंसा' आत्मनः सर्वोत्तमं साधनमस्ति। आत्मा परमात्मनोऽपररूपमस्ति। अतएव आत्मनः उन्नति दृष्ट्वा परमात्मा प्रसन्नतां प्राप्नोति उन्नतिं करोति। यदा समाजस्य सदस्याः अहिंसावादिनो भविष्यन्ति तत् समाजोऽपि उन्नति प्राप्स्यति। इदं सत्यं यत् अहिंसा परमोधर्मः। अधुना जगति हिंसायाः साम्राज्यमस्ति। युद्धादीनि आधुना मनोरञ्जनस्य साधनानि सन्ति। पशुहत्यापि भवति। वैदिक काले मनुष्याणां पशूनां च बलिप्रथा आसीत्। हिंसा त्रिविधा भवति–मनसा, वाचा, कर्मणा च। तिसृणां हिंसानां परित्यागोऽहिंसेति कथ्यते। अहिंसया नरः सुखमनुभवति निर्भयं च विचरति। प्रत्येक धर्म हिंसायाः निन्दा समुपलभ्यते। अहिंसा देव्यायाः शरणमुपागतेन महात्मगांधि-महाभागेन वैदेशिकपाशेन निगडिता स्वकीया भारत-भूमिः बन्धनमुक्ता कृता। भगवान् बुद्धोऽपि जनान् अहिंसायाः महत्त्वमवोचत्। 'तस्य पञ्चशील' सिद्धान्तेषु अहिंसायाः सर्वप्रथमं स्थानं वर्तते। महात्मा गान्धि महाभागस्तु स्वकीयं जीवनमेव

अहिंसायाः समाराधे समर्थितवान्। अहिंसायाः वलेन विश्वशान्तिः सम्भवः अहिंसाभावनया जनेषु विश्वबन्धुत्वोध्येनपारस्परिक विवादः शाम्यति इत्थं मतभेद रहित प्रजासु सुखस्य साम्राज्यं भविष्यतीति निर्विवादः।

अहिंसोपासकः कलिंगाधिपतिः सम्राट् अशोकोऽपि प्रजासु अतीव प्रियो जातः स अहिंसायाः प्रचारोऽपि देशः विदेशे अकारयत्। अहिंसाऽस्माकं भारतीय संस्कृते परं महत्त्वपूर्णमेव वर्तते। अतः सत्यमेव उच्यते— **अहिंसा परमोधर्मः।**

## ➡ (28) छात्रजीवनम्

[2012 HF]

**अन्य शीर्षक**

- **विद्यार्थी जीवनम्**

ब्रह्मचर्य, गार्हस्थ्यं, वानप्रस्थ, संन्यासश्चेति चत्वारः आश्रमाः सन्ति। ब्रह्मचर्याश्रमे बालकाः गुरुं समीपं गत्वा विद्याया अध्ययनं कुर्वन्ति। स एव कालः विद्यार्थीजीवनम् कथ्यते। अस्मिन् आश्रमे छात्राः विद्याध्ययनं कुर्वन्ति स्म। विद्यार्थिजीवनम् अतिरमणीयं अस्ति। मानवजीवनस्य कोऽपि भागः तादृशो नास्ति, यो विद्यार्थिजीवनस्य साम्यं कुर्यात्। एतस्मिन् बाल्यजीवने लवणतैलयोः चिन्ता न भवति नापि स्वपालनपोषणयोः। अस्मिन् काले बालः चिन्तारहितं भवति।

अधुना विद्यार्थिजीवनम् शुल्कं दत्वा पठन्ति, परन्तु प्राचीनकाले विद्यार्थिनः गुरो सेवां कृत्वा एव पठन्तिस्म। वर्तमानकालस्य विद्यार्थिनं जीवनं बाह्याडम्बरपूर्णमस्ति। ते यथा कथञ्चि परीक्षां समुत्तीर्य कुत्राऽपि भृत्यपदं प्राप्य दग्धोदरपूर्णं भूत्वा स्वाध्ययनस्य कृतार्थतां मन्यन्ते। ते येषु शास्त्रेषु परीक्षां समुत्तरन्ति तद्विषयकं पर्याप्त ज्ञानमपि न सम्पादयन्ति। अर्थादिबोधम् उपेक्ष्य ग्रन्थाक्षराण्यव रटन्तस्ते वस्तुतः पुस्तककीटाः एव सन्ति। आधुनिक विद्यार्थिजीवने संशोधनं आवश्यकम् अस्ति। येन विद्यार्थिनः स्वकर्त्तव्य कृत्वा गुरुभक्ताः भवेयुः बाह्याडम्बरं च परित्यज्य दत्ताबधानाः विद्या पठेयुः। यदैव ते शरीरसुखं परित्यज्य विद्याध्ययनं च करिष्यन्ति तदैव विद्वांसः भविष्यन्ति। यतो हि सुखार्थिभिः विद्यादुष्प्राप्या तथा चोक्तम्–

**सुखार्थिनः कुतो विद्या विद्यार्थिनः कुतो सुखम्।**
**सुखार्थी वा त्यजेद् विद्या विद्यार्थी वा त्यजेत् सुखम्।।**

## ➡ (29) मम प्रियं पुस्तकम्

**अन्य शीर्षक**

- **कश्चिद् ग्रन्थः**
- **मदीयं प्रियपुस्तकम्**
- **रामायणं**

रामायणं लौकिक संस्कृत भाषानिबद्धम् आदिकाव्य इति कथ्यते। अस्य ग्रन्थस्य रचना आदिकविना वाल्मीकिना कृता। अस्मिन् महाकाव्ये भगवतो रामचन्द्रस्य चरितं वर्णितं वर्तते। अस्मिन् काव्ये सप्तकाण्डानि सन्ति। दशरथनन्दनो रामो मानवतायाः आदर्शभूतः। त्रेतायुगे जातस्य परमादर्शभूतस्य रघुवंशस्य विविधाः कथाः जनैः सावधानतया कथ्यन्ते श्रूयन्ते च। महर्षि वाल्मीकिना रघुवंश चूडामणेः श्रीराम भद्रस्य सर्वाः कथाः रामायणे विलिखिताः।

रामायणम् उपजीव्य लौकिक संस्कृति भाषान्तरे च बहुनां काव्यानां-दृश्य-काव्यानां च–रचना भूता। अत्र करुणरसः स्वाभाविकरूपेण मनोहरति। काव्य रसपानरसिकाः विलक्षण विचक्षणा उत्तममहाकाव्य निर्देशावसरे रामायणी कथां प्रथमाद्रियन्ते। न केवलं विविध रसालंकार गुण-छन्दसां प्रयोगचमत्कारेण अपितु रामादिलोकप्रसिद्धपात्राणाम् आदर्शभूत चरित्रचित्रकारणेन अस्याः कथायावैशिष्ट्यं विद्वद्भिः स्वीक्रियते। रामायणी कथायाः पात्रसृष्टि सजीवा व्यक्तित्व परिपूर्णा च दृश्यते। विश्वविश्रुतासु संस्कृतिषु 'भारतीय संस्कृति' सर्वदा एव स्वान्तर्निहित गौरवेण प्राथम्यं भजते, तस्याः संस्कृतेः स्रोतो-रूपेण रामायणी कथाया उल्लेखः कर्तुं शक्यते। रामायणग्रन्थे भावगाम्भीर्यं, भाषावैभवं, शैली-रमणीयकं, परिष्कृतिप्राचुर्यं काव्य विभूतिः च पदे-पदेऽवलोक्यते।

पित्रोराज्ञापालनम् भ्रातृप्रेमवैशिष्ट्यं पातिव्रतपरिपालनम् आपदि-धैर्यस्वीकरणं विदेशे नीतिव्यवहरणं च रामायणे विभिन्नकथासु परिपूरितं विद्यते।

## ➡ (30) सन्तोषः परमं सुखम्

**अन्य शीर्षक**

- **सन्तोष एव पुरुषस्य परमम् निधानम्**

अयमेव सर्वेषां सुखानां मूलमस्ति। सन्तोषः पुरुषस्य महद् धनं कथ्यते। सन्तोषरूपे धने प्राप्ते सति सर्वाणि धनानि प्राप्तानि भवन्ति। सन्तोषेण मानवाः सर्वसुखम् लभन्ते। सन्तोषेण एव मानवाः जीवने प्रसन्नाः भवन्ति। संतोषरहिताः जना अनन्तकोटिधनं प्राप्यापि सदा दुःखिता एव दृश्यन्ते। असंतोषिणां जीवनमशान्तियुक्तं दुःखमयं च भवति। सन्तोषेण विना पराभवं प्राप्नुवन्ति जनाः। सन्तोषः सर्वश्रेष्ठं धनम्। अस्मिन् लोके सन्तोषेण समं किमपि धनं नास्ति। स्वप्रयत्नानां फलस्वरूपं योऽत्र लब्ध्वा तृप्तिमनुभवति स संतोषी कथ्यते य लब्ध्वापि तृप्तिं न लभते सोऽसंतोषी भवति। संतोषिणां चेतांसि परेषां सम्पदम् विलोक्य मलिनानि नैव भवन्ति। अतएवोच्यते—

**सर्वत्र संपदस्तस्य, संतुष्टं यस्य मानसम्।**
**उपानद्गूढवृपादस्य, ननु चर्मातेव भूः॥**

वैभवसम्पन्नशीलाः अपि असन्तोषिणः सर्वदा दुःखं लभन्ते। यत्र सन्तोषिणः अर्थान् न अनुधावन्ति तत्र असन्तोषिणः न केवलं शारीरिकं कष्टं लभन्ते, अपितु मानसिकं कष्टमपि लभन्ते च। सन्तोषश्चिन्तामणिः इति मनीषिणः वदन्ति तत् शोभनं। जनाः सन्तोषेणादरं लभन्ते। सन्तोषस्यातीव महिमा अस्ति।

## ➡ (31) तीर्थराज प्रयागः [2015 DT, 19 CZ, 20 ZP, ZU]

**अन्य शीर्षक**

- **प्रयागवर्णनम्** [2013 BM]
- **सतीर्थराजो जयति प्रयागः** [2011 HZ, 14 CW]

अस्मिन् देशे अनेकानि तीर्थस्थलानि सन्ति यथा— केदारनाथ-बद्रीनाथ-द्वारिका-जगन्नाथपुरी-रामेश्वर-हरिद्वार-काशी-प्रयाग-प्रभृतीनि प्रसिद्धानि तीर्थानि सन्ति। प्रयागः सर्वेषु तीर्थेषु श्रेष्ठः अस्ति अतएव प्रयागराजः तीर्थानां राजा कथ्यते। उत्तरप्रदेशराज्ये प्रयागस्य विशिष्टं स्थानमस्ति। अत्र ब्रह्मा श्रेष्ठं यागम् अकरोत् अतः अस्य नाम 'प्रयागः' अभवत्। प्राचीनकालेऽत्र बहवः अश्वमेधादयः यज्ञाः सम्पन्नाः अभवन्। इदं नगरं भारतवर्षस्य प्रमुखनगरेषु वर्तते। प्रयागस्य अपरं नाम 'इलाहाबाद' इति अकबरः स्वकीयस्य इलाही धर्मस्य अनुसारेण अकरोत्।

तीर्थराज प्रयागः गंगायमुनयोः संगमे स्थितः अस्ति। ऋषेः भरद्वाजस्य आश्रमः अपि अत्रैव अस्ति यत्र पुरा दशसहस्त्रमिताः विद्यार्थिनः अधीतिनः आसन्। प्रयागः विविध-विधानां प्रमुखं केन्द्रम् अस्ति। अत्र उच्चशिक्षायाः प्रधानकेन्द्रं प्रयागविश्वविद्यालयं वर्तते। अत्रैव उत्तरप्रदेशस्य राज्यस्य उच्चन्यायालयः, माध्यमिक शिक्षा-परिषद् राष्ट्रभाषा-हिन्दी-प्रचारे संलग्नं हिन्दी साहित्य सम्मेलनं प्रसिद्धम् आनन्दभवनं च विराजन्ते।

भारतस्य स्वतन्त्रतान्दोलनस्य इदं नगरं प्रधानकेन्द्रम् आसीत्। श्रीमोतीलालनेहरू, महामना मदनमोहनमालवीयः आजादोपनामकश्चन्द्रशेखरः, अन्ये च स्वतन्त्रतासंग्रामसैनिकाः अस्यामेव पावनभूमौ उषित्वा आन्दोलनस्य सञ्चालनम् अकुर्वन्। राष्ट्रनायकस्य पण्डित जवाहरलालस्य इयं क्रीडास्थली कर्मभूमिश्च। भारतवर्षस्य त्रयः प्रधानमन्त्रिणः अत्र जन्म अलभन्त। उद्योगव्यापार दृष्ट्या अपि प्रयागः उत्तरप्रदेशेषु पञ्चसु महानगरेषु एकतमोऽस्ति।

एवं गङ्गा-यमुना-सरस्वतीनां पवित्रसङ्गमे स्थितस्य भारतीयसंस्कृतेः केन्द्रस्य च महिमानं वर्णयन् महाकविः कालिदासः सत्यमेव अकथयत् —

**समुद्रपत्न्योर्जलसन्निपाते पूतात्मनामत्र किलाभिषेकात्।**
**तत्त्वावबोधेन बिनापि भूयस्तनुत्यजां नास्ति शरीरबन्धः॥**

## ➡ (32) आतंकवादः

[2011 IA, 20 ZU]

**अन्य शीर्षक**

- **भारतवर्ष आतंकवादः**
- **आतंकवादः समस्या समाधानश्च**
- **आतंकवादः देशस्य च अखण्डता**
- **आतंकवादभयम्**
- **आतंकवादोन्मूलनम्** [2016 TM]

हिंसात्मकाः गतिविधयः एव आतंकवादः इति कथ्यते। इमे गतिविधयः केन पुरुषेण समूहेन वा सत्तापक्षे बलपूर्वकं क्रियन्ते। ते येन-केन प्रकारेण स्व इच्छान् आपूरयितुं प्रयत्नं कुर्वन्ति। राजनीतिकशर्तान् स्वीकारयितुं उग्रवादिनः तेषां च संगठनाः हिंसायाः अपहरणां बम विस्फोटकानां च मार्गान् आश्रित्य प्रशासनं आनमितुं प्रयासं कुर्वन्ति। आतंकवादः राजनीतिकमहत्त्वाकांक्षाणां सुपरिणामः। भारतवर्षे पंजाब-कश्मीर-असम-अन्यश्च पूर्वोत्तराणां राज्यानां आतंकवादिनः स्वगतिविधयः कुर्वन्ति स्म।

अद्य विश्वस्य अनेकाः देशाः आतंकवादिभिः त्रायन्ते। श्रीलंकायां 'लिट्टे' इति नाम्ना प्रसिद्धा आतंकवादिनः स्वोद्देश्यं आपूरयितुं संलग्नाः तु रूस देशस्य चेचन्यायां आतंकवादिनः संलग्नाः। आतंकवादः न तु केवलं भारतस्येव समस्या अपितु संसारस्य अनेकाः देशाः अस्याः समस्यायाः ग्रसिताः सन्ति। 2001 ईस्वीये वर्षे सितम्बर मासस्य एकादशायां तारिकायां आतंकवादिनः अमेरिकादेशस्य ट्विनटावर्से पेंटागने च वायुयानेन विनाशं अकुर्वन्। आतकं परिसमाप्तुं अस्य मूलेषु प्रहारं कर्तव्यम्। आतंकवादिनां संगठनानाम् अर्थतन्त्रं समूलं नश्येत्। आतंकवादः सर्वदृष्टया निन्दनीयं त्याज्यम् अस्ति। गान्धि महोदयस्य अस्मिन् देशे आतंकवादं न कोऽपि स्थानम् अस्ति।

## ➡ (33) राष्ट्रभाषा हिन्दी *अथवा,* अस्माकं राष्ट्रभाषा

हिन्दी भाषा विविधभाषा बहुले भारते राष्ट्रभाषा पदं भजते। अस्य कारणं हिन्दी भाषायाः देवनागरीलिपिः तथा अस्याः सरलता अस्ति। देवनागरी लिपिः विश्वस्य सुसरला तथा वैज्ञानिकी लिपिः विद्यते। सरलतायाः दृष्ट्या कापि भाषाः अस्याः समतां नैवाधिगच्छति। पाश्चात्याः जनाः सहजतया इमां भाषाम् अध्येतुं शक्नुवन्ति। अद्य तु सर्वेषु एव देशेषु अस्याः अध्ययनं विधीयते।

अस्याः भाषायाः महाकवयः कबीर-सूर-तुलसी-जायसी-भूषण-बिहारी-प्रसाद-पन्त-महादेवी प्रभृतयाः मातुः भारत्याः वरदपुत्राः सन्ति। इमे न केवलं भारतस्य अपितु विश्वस्य मनीषिणामपि मनांसि मोहयन्ति। एभिः भारतीया संस्कृतिः हिन्दी भाषायामवतारिता। अद्य तुलसीदासं, सूरं, प्रसादम् अवबोद्धु पाश्चात्याः भारतभुवमागच्छन्ति। अद्य राजकीय कार्येषु हिन्दीभाषा भ्रशं प्रयुज्यते। किञ्चित्कालात्पूर्वं मौरिशसदेशे विश्व हिन्दी सम्मेलनं जातम्। तत्र विश्वस्य हिन्दी विद्वांसः अनुरागिणश्च समायाताः। सर्वैः हिन्दी प्रेमिभिः अस्याः भाषायाः प्रचाराय प्रसाराय च पुण्यः संकल्पः ग्रहीतः। तत्र भारतेन गम्भीरा भूमिका निर्व्यूढा। अस्माभिः सर्वैः हिन्दी प्रेमिभिः स्वमातृ-भाषायाः प्रचाराय प्रसाराय च सहयोगः प्रदातव्य।

भारतीयैः स्वराष्ट्रभाषायै एवं महत्त्वं देयम्। अद्य भारते कथ्यते कैश्चिज्जनैः यद् हिन्दी भाषा आन्तर्राष्ट्रीय व्यवहारार्थं नैव क्षमा, परन्तु तैरिदं स्मरणीयं यद् हिन्दी भाषा आन्तर्राष्ट्रीयव्यवहाराय समर्थाऽस्ति सर्वभावेन। यतः हिन्दी भाषायाः विद्वान्सः सर्वेषु एव देशेषु विद्यन्ते। महद्दुःखमद्य तु भारतीयः आंग्लभाषायाः ज्ञानद्वारा आत्मानं ख्यापयति, कृतकृत्यतामनुभवति। तस्य बुद्धौ भ्रमपूर्णः अयं विचारः रूढः सञ्जातोऽस्ति यद् हिन्दीभाषया जीवने कापि उन्नतिः प्राप्तुं न शक्यते।

## ➡ (34) वेदोऽखिलो धर्ममूलम् (2018 BK)

1. वेदोऽखिलो धर्ममूलम् इत्याह मनुः।
2. वेदः धर्मे प्रमाणम् — इति अस्य वाक्यस्य अर्थः भवति।
3. वेदाः चत्वारः सन्ति — ऋग्वेदः, यजुर्वेदः, अथर्ववेदः, सामवेदः इति।
4. वेदः भारतीय धर्मसंहिता अस्ति।
5. वेदमूलाः स्मृत्यः अपि धर्मे प्रमाणम् इत्यत्र न कापि शङ्का कार्या।
6. येऽपि वेदमूला ग्रन्था उपनिषदादयः ते सर्वेऽपि धर्ममूलाः सन्ति।
7. वेदोनाम सर्वज्ञानमयः, सर्वेषां च धर्माणाम् आकारः।
8. महाभारते उक्तं यद् असौ एव धर्मः यो अन्यस्य धर्मस्य विरोधं न करोति।
9. धर्मम् अवलम्ब्य अथत्वे जनाः परस्परां घृणाम् उत्पादयन्ति।
10. सर्वेषु सम्प्रदायेषु मूलभूतः धर्मः तु एकः एव।
11. धारणाद् धर्मः प्रतिष्ठाम् आप्नोति।
12. अतएव 'मातृदेवोभव', 'पितृदेवोभव', 'आचार्यदेवोभव' इत्याद्यादेशाः धर्मव्यवस्थापकाः एव सन्ति।
13. सत्यं वद् धर्मं चर-इत्यादि वाक्य जनानां धर्ममूलत्वं अविरुद्धम् एव।
14. मनुना यः कश्चिद् अपि धर्मः प्रतिपादितः स सर्वोऽपि वेदे अभिहितः अस्ति।
15. धर्मस्य आडम्बराद् मुक्तिः नितराम् आवश्यकी।

## ➡ (35) विद्यालयस्य अनुशासनम्

1. अनुशासनं विना किमपि कार्यं कापि वा व्यवस्था सम्यक् न प्रचलति।
2. अनुशासनपराणां जनानां सर्वे सकारम्भाः सफलाः भवन्ति।
3. अनुशासनस्य पाठं प्रकृतिः प्रददाति।
4. सूर्यः सदैव अनुशासने तिष्ठति, अत एव यथा समयम् उदेति यथासमयं च अस्तमेति।
5. चन्द्रमाः अपि अनुशासने तिष्ठन् क्षीयते वर्धते च।
6. अस्माकं विद्यालयस्य अनुशासनं सर्वैः स्तूयते।
7. तत्र सर्वेऽपि अध्यापकाः अनुशासनपराः सन्ति अत एव छात्राः अपि अनुशासनप्रियाः सन्ति।
8. तत्र यः अनुशासनं न परिपालयति असौ दण्डयः भवति।
9. अनुशासनस्य पाठशाला, वस्तुतः, गृहम् एव भवति।
10. ये बालकाः गृहे अनुशासनव्रताः ते विद्यालये अपि अनुशासनव्रताः भवितुम् अर्हन्ति।
11. अस्माकं प्रधानाचार्यः ब्रूते–यः छात्रजीवने अनुशासनं पालयति तस्य सर्वम् अपि जीवनम् अनुशासनबद्धं भवति।
12. समुद्रः सर्वदा प्रकृतेः अनुशासने तिष्ठति अत एव असौ गंभीरः रत्नाकरः च कथ्यते।
13. अस्माकं विद्यालये एका अनुशासन परिषदः अस्ति।
14. समये-समये विद्यालयीयानुशासनस्य समीक्षा अपि भवति।

## ➡ (36) स्वतन्त्रता-दिवसः

*अथवा,* **स्वातन्त्र्यफलम्** [2013 BK]

ईसवीये 1947 तमे वर्षे अगस्तमासस्य पञ्चदशे दिवसे अस्माकं श्रेष्ठः देशः स्वतंत्राऽभूत्। अस्मिन्नेव दिवसे आंग्लशासकाः

शासनसूत्रम् अस्माकं देशस्य नेतृणां हस्तेषु समर्प्य स्वदेशं गताः। तस्मिन् दिनं वयं स्वतन्त्रताः अभूम? इदमेव तद् दिनम् आसीत्, यस्य कृते अस्माकं पूर्वजाः महतं बलिदानम् अकुर्वन्। बहवः कारागारेषु असह्यानि कष्टानि अन्वभवन्। अनेके यस्टिकाभिः प्रताड़िताः, अन्ये गुलिकाभिः हताः, अन्ये च बहवः शूलमारोप्य हताः। बहुना मूल्येन प्राप्ता स्वतन्त्रता सर्वेषां देशवासिनां कृते महत् उत्सवस्य विषयऽभवत्।

उपरिवर्णिते स्वतंत्रता दिवसे सर्वस्मिन् देशे महान् उत्सवः समजायत। प्रसन्ना भारतीयाः आनन्दमग्नाः हर्षेण उन्मत्ता आसन्। सर्वेषु राजकीय-कार्यालयेषु त्रिवर्णोध्वजः समुच्छ्रितः। सर्वत्र ग्रामेषु च स्थाने-स्थाने उत्सवाः अभवन्, मिष्ठान्नानां वितरणम्, नर्तनम्, गानं च यत्र-तत्र भवन्ति स्म। जनाः दीपावलीभिः गृहाणि प्रकाश्य स्वहर्षातिशयं सूचितवन्तः। नगराणां ग्रामाणां च विचित्रैव शोभासीत्।

स्वतंत्र भारतराष्ट्रस्य प्रथमः प्रधानमंत्री पंडित जवाहरलाल नेहरूः राजधान्यां लोहितवर्णे दुर्गे त्रिवर्णध्वजम् उच्छ्रितं कृत्वा भारतीयस्वतन्त्रतायाः घोषणाम् अकरोत्। ततः प्रभृति अगस्तमासस्य पञ्चदशः दिवसः अस्माकं देशस्य महत् राष्ट्रियं पर्व सञ्जातम्, यत् प्रतिवर्ष ध्वजारोहणम् कृत्वा स्वतन्त्रता दिवसरूपेण सम्पूर्णे देशे सम्मानितं भवति।

आधुनिके तु समये प्रतिवर्षं स्वातन्त्र्योत्सवः सम्पूर्णे देशे भवति। प्रातः छात्राणां 'प्रभात फेरी' कार्यक्रमः भवति। ग्रामे-ग्रामे नगरे-नगरे सभानाम् आयोजनम् भवति। सभासु नेतृणां प्रेरणाप्रदानि भाषणानि भवन्ति।

## ➡ (37) हिमालयः

हिमालयः भारतस्य उत्तरस्यां दिशि स्थितः। संसारस्य पर्वतेषु उत्तुङ्गतमस्यास्य गिरेः उच्छ्रिताः शिखरमालाः सर्वदा एव हिमाच्छादिताः तिष्ठन्ति तस्मात् एव अयं हिमालयः कथ्यते। अस्य शिखराणि देशीयानां विदेशीयानां च आकर्षणकेन्द्राणि अपि वर्तन्ते। हिमालयात् एव गंगा-यमुना-शतद्रु-सरयु प्रभृतयः नद्यः निःसृत्य प्रवहन्ति। अस्य उपत्यकासु बहुप्रकाराणि फलानि उत्पद्यन्ते, नानाविधा खगमृगाश्च वसन्ति।

हिमालयस्य उपत्यकायां कश्मीरो नाम प्रदेशः विद्यते। अयं प्रदेशः स्वकीयेन प्राकृतिक सौन्दर्येण भूस्वर्गः कथ्यते। कश्मीर प्रदेशात् पूर्वस्यां दिशि किन्नरदेशः स्थितः अयमेव प्राचीनसाहित्ये 'देवभूमि' नाम्ना प्रसिद्ध आसीत्। हिमालयः अस्माकं देशस्य रक्षकः वर्तते। दीर्घकालं यावदसौ पर्वतः प्रहरीव स्थिते भारतस्य रक्षां अकरोत् किन्तु अद्यत्वे तु अस्य रक्षा भारतेन करणीया आपातिता, यतो हि अस्माकं प्रतिवेशी चीनदेशः कश्चिद् भूभागं स्वकीयं कृत्वा यदाकदा भारतीयसीम्न उल्लङ्घनं हिमालयस्य पारात् करोति। अनेक अस्माकं शूराः अस्यदिवानिशं दृढ़ तिष्ठन्तो रक्षन्ति। अतः कश्चिदपि शत्रुः एनम् उल्लंघ्य भारते नागन्तु शक्नोति। भारतवर्षस्य सुखं समृद्धिश्च हिमालयैव अधीना।

●●

ढ

# खण्ड - 'ङ'

# अलंकार

**( अंक - 3 )**

## (1) उपमा अलंकार

[2016 DT, TP, TK, TM, TJ, 17 NJ, NK, NL, NM, NN, NO, NP, 18 BK, BN, 19 CZ, DA, DB, DC, DD, DE, DF, 20 ZO, ZQ, ZR, ZS, ZT, ZT]

**परिभाषा –** उपमान और उपमेय के प्रस्फुट और मनोरम साम्य (सादृश्य) को उपमा कहते हैं। "प्रस्फुट सुन्दरं साम्यम् उपमा।"

**उदाहरण–** वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ।।

**स्पष्टीकरण –** इस श्लोक में 'पार्वती-परमेश्वरौ' उपमेय है, 'वागर्थौ' उपमान है, 'सम्पृक्तौ' साधारण धर्म है और 'इव' उपमावाचक शब्द है। चूँकि यहाँ उपमान और उपमेय में सम्पृक्ति का सादृश्य दिखाया गया है, अतः यहाँ उपमा अलंकार है।

**अन्य उदाहरण** (1) स्वप्नेषु समरेऽपि त्वां विजयश्रीर्न मुंचति।
प्रभाव प्रभवं कान्तं स्वाधीन पतिका यथा।

यहाँ पर 'स्वाधीन पतिका' उपमान है, 'विजयश्री' उपमेय है, 'न मुञ्चति' साधारण धर्म है तथा 'यथा' उपमावाचक शब्द है। इस प्रकार यहाँ पूर्णोपमा है।

(2) मधुरः सुधावदधरः पल्लवतुल्योऽतिपेलवः पाणिः।
चकितमृगलोचनाभ्यां सदृशी चपले न लोचने तस्याः।।

'मधुरः सुधावद् अधरः' में 'अधर' उपमेय, 'सुधा' उपमान 'मधुरता' साधारण धर्म तथा 'वत्' वाचक शब्द है। 'पल्लवतुल्योऽतिपेलवः पाणिः' में 'पाणि' उपमेय, 'पल्लव' उपमान, 'अतिपेलवः' साधारण धर्म तथा 'तुल्यं' वाचक शब्द है। इसी प्रकार 'चकित मृगलोचनाभ्यां सदृशी चलपे च लोचने, में लोचन उपमेय, 'चकित मृग के लोचन' उपमान, 'चपलता' साधारण धर्म तथा 'सदृश' उपमा वाचक शब्द है। इस प्रकार यहाँ पूर्णोपमा अलंकार है।

## (2) रूपक अलंकार

[2015 DU, 16 TO, TP, 17 NJ, NL, NM, NN, NO, NP, 18 BN, 19 CZ, DA, DB, DC, DD, DE, DF, 20 ZO, ZP, ZQ, ZR, ZS, ZT, ZT]

**परिभाषा–** जहाँ उपमेय और उपमान में अभेद प्रदर्शित किया जाय वहाँ रूपक अलंकार होता है। 'तद्रूपकमभेदो य उपमानोपमेययोः।'

**उदाहरण –** पर्याप्तपुष्पस्तवकस्तनाभ्यः स्फुरत्प्रवालोष्ठमनोहराभ्यः।
लतावधूभ्यस्तरवोऽप्यवापुः विनम्रशाखाभुजबन्धनाति।।

**स्पष्टीकरण –** लताओं, पुष्पस्तवकों और किसलयों में अत्यन्त भिन्न पदार्थ वधू, उरोज और ओष्ठ का अभेद आरोप किया गया है, अतः यहाँ रूपक अलंकार है।

**अन्य उदाहरण –** किसलयकरैर्लतानां कर कमलैः कामिनां मनो जयति।
नलिनीनां कमलमुखैर्मुखन्दुभिर्योषितां मदनः।।

यहाँ उपमान और उपमेय में साभ्य दिखाते हुए किसलय में करत्व, कर में कमलत्व, कमल में मुखत्व और मुख में चन्द्रत्व का अभेद आरोप किया गया है, अतः यहाँ रूपक अलंकार है।